न्नाभावो विषयो वक्तुं शक्यते अत एवेति वेन्न॥ तथाप्यनुगतधर्मं विनानुगतप्रतीतेरुपपादयितुमश

66

क्यत्वस्य प्रागेवोक्तत्वात्॥ ननु यत्किंचिद्[illegible]यवति घटपटौ न स्त इति प्रतीतेर्द्वित्वसामान्यं न प्रतियोगितावच्छेदकं
तथा विद्यय यत्किंचिद्द्वयसत्त्वे तदवच्छिन्नो भावोऽस्त्यान्नापि द्वित्वविशेषः॥ तत्तद्द्वित्वेनानुपस्थितेः केवलघटेऽस्त्यपि दि
तथा प्रत्ययेन ज्ञस्यैके घटे सपटत्वादिकमपि प्रतियोगितेत्यन्न्यैतेष्वनुगतप्रत्ययोऽनुपपन्न एवेति चेन्न॥ द्वित्वं द्वित्व
धर्मितावच्छेदकीभूतं घटत्वं पटत्वं तथा प्रतीयोगितावच्छेदकता चात्र व्यासज्यवृत्तिर्ग्राह्या॥ प्रतियोगितावच्छे
दकतावच्छेदकावच्छिन्ने घटपटौ न स्त इति नानुपपत्तिलेशोऽपीति ध्येयं॥ तयोरिति प्रतियोग्यभावयोरे
काधिकरणे वृत्तित्वरूपविरोधादित्यर्थः॥ नन्वेकस्मिन्नपि समवायेन द्वित्वमस्त्येवेत्यत आह। एकोऽने
द्वाविति॥ एकस्मिन्नपि समवायेन द्वित्वस्य सत्त्वेन एको द्वाविति प्रतीत्यापत्तिरतः समवायेन तत्सत्त्वेऽपि प
र्याप्तिसंबंधेन तदसत्त्वान्न तथा प्रतीतिरिति रूपेयं॥ एवं च प्रतियोगिता[illegible]वच्छेदकपर्याप्त्यधिकरणके वा
भावस्य विरोधेन्न तदनुपपत्तिरिति भावः॥ प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधाद्याति
योगिमत्यपि नातिरिक्तविशेष्य भावो विरुद्ध इत्याह॥ अत एवेति॥ प्रतियोगितावच्छिन्नेनैव अभावस्य नच्छे[illegible]क
विरोधादेवेत्यर्थः॥ इयंवीति पुरुषो नास्तीति धीः॥ तस्य पुरुषस्य॥ न च क्वचिद्दण्डाभावः क्वचित्पुरुषा
भावो विषय इति वाच्यं॥ विषयानुगमं विना अनुगतप्रतीत्यनुपपत्तिरित्यस्यासंकेदावेदित[illegible]तद्यात्
नन्वायात्तत्पदार्थातिरिक्तोऽभावस्तथापि तज्ज्ञायनविशेषणताप्रत्यासत्तिः किंतु चक्षुरादिनावह्न्या
दिज्ञानासंभवाद्यतिथा[illegible]मानादि प्रमाणान्तरत्वं तथा अभावप्रत्यक्षमानां संयोगादिसन्निकर्षाणां अभावेने
द्रियपरतां दर्गाहकत्वासंभवात् प्रमाणस्यैवेन्द्रियस्याप्यग्राहकत्वात्॥ अन्यथा निमीलितनयनस्यापि

67

ता ष॰

घटादिग्रहापत्तेरित्यनुपलब्ध्याख्यं प्रमाणांतरं समवायग्राहकमेवेत्यर्थः ॥ न च विशेषणतैव सन्निकर्षः तस्यासत्वेना
कूप्तत्वात् । समवायानंगीकारेण समवायग्राहकत्वेनाप्यकूप्तत्वाच्च ॥ तथा घटाभावस्यानुपलब्धिरूपप्रमा
णजन्यमनुपलब्ध्यमेव ज्ञानं न तु साक्षात्कारः साक्षात्कारत्वस्येंद्रियजन्यव्याप्यत्वात् ॥ न चैवं निमीलितनय
नस्यापि घटाभावग्रहापत्तिः संख्यामेव निरूप्यत इति नियमात् ॥ अभावग्रहे ऽधिकरणप्रत्यक्षस्य जन
कतया तत्र ज्ञानाधर्मींद्रियापेक्षणात् ॥ अत एव तज्जनकतया ऽन्यथासिद्धमिंद्रियं नाभावग्रहे हेतुः न चाधि
करणप्रत्यक्षस्य व्यापारतया न तेन तदन्यथासिद्धिः । व्यापारेण व्यापारिणो ऽन्यथासिद्ध्यसंभवात् ॥ अ
न्यथा च हेतुः सन्निकर्षेण चक्षुषोऽप्यन्यथासिद्धिः असज्यते इति वाच्यं ॥ इंद्रियस्य जनकत्वसंभवे ऽधिकरणप्रत्य
क्षस्य तद्व्यापारत्वं तद्रूपनकृप्तसन्निकर्षाभावात् ॥ अत एवानुपलब्धिप्रमाणस्यापि सत्वाच्चत्वार्येव प्र
माणानीति असंगतमिति निष्कृष्टं स्वमतं दूषयितुमुपन्यस्यति ॥ तदा इत्यादिना नेंद्रियग्राह्याः । नेंद्रि
यजन्यलौकिकसाक्षात्कारविषयः । कूप्तसन्निकर्षाणां संयोगादिपंचानां सन्निकर्षाणां अभावे ऽसंभवात् ।
ननु तर्हि अभावग्रहानुपपत्तिरित्यत आह ॥ किंत्विति ॥ ईदृशप्रमाणांतरजन्यज्ञाने च सन्निकर्षेऽपि क्षतेनेंद्रि
यजन्यमिति भावः । प्रमाणांतरेति ॥ धर्मिकल्पनातो धर्मकल्पनायां लघीयस्त्वादिति यावत् ॥ अनुपलब्धेः
अकूप्तधर्मिजातीयप्रमाणांतरकल्पनमपेक्ष्य कूप्तप्रत्यक्षप्रमाहेतुतया विशेषणतारूपसन्निकर्षक
ल्पनमेव लघीयमित्यर्थः । तथा चेंद्रियस्यैव तत्कृतहेतुरिति भावः । अन्यथेति । सन्निकर्षकल्पनयोपपन्नाव

अभावप्रतियो
गिज्ञानाभ्यां ४

न॰

68

ऽपि प्रमाणांतरकल्पनेत्यर्थः॥ अन्यसन्निकर्षांतराकल्पनमित्यर्थ इत्यपि केचित्॥ कुम्भानां संयोगादीनां प्रमाणां सन्नि-
कर्षाणां। शंकते॥ तत्रेति॥ प्रत्यक्ष एव। प्रत्यक्षविषय एव॥ अयं शब्दः तथा च जन्यसाक्षात्कारत्वावच्छिन्नं प्रति
सन्निकर्षत्वेन हेतुतया शब्देऽपि सन्निकर्षमावश्यकं। सन्निकर्षत्वं च संयोगाद्यन्यतमत्वमिति भावः। अध्यक्ष
एवेत्यनंतरमस्तीति शेषः॥ तथा चा[illegible]त्रापि अभावग्रहार्थं सन्निकर्षापेक्षणमावश्यकमिति भावः।
ननु शब्देऽपि प्रमाणांतरोपपत्तेरित्युक्तं॥ प्रतिबंदेरनुत्तरत्वात्क्तोदित्यस्वरसादाह। किं चेति॥ ननु व्यापाराभा-
वेऽपि फलायोगव्यवच्छिन्नकरणत्वमुपपद्यते एव अत एव साधकतमं करणमिति सूत्रमपीत्यत आह। व्यापा-
रवदिति। निमीलननयनदशायामंधकारे च चक्षुषोऽपि फलायोगात्॥ स्वेतरयावत्कारणसमवधानेऽपि यद-
व्यवहितोत्तरक्षणे कार्योत्पत्तिस्तत्त्वमेव फलायोगव्यवच्छिन्नत्वं वाच्यं। एतस्य च यावत्कारणघटिततया
गुरुत्वेन व्यापारवत्कारणत्वस्यैव करणत्वस्वरूपत्वौचित्येनानुपलब्धेः प्रमाणत्वव्याघात इत्य[illegible]-
ति भावः॥ उक्तमिति। उक्तं प्रमाणमित्यर्थः। वस्तुतस्तु धर्मिकल्पनायामन्यायेनैव सन्निकर्षकल्पनेन
तु प्रमाणांतरकल्पनमिति पूर्वोक्तयुक्तिरेव रमणीयेति रहस्यं॥ अनुपलब्ध्याख्यप्रमाणांगीकारे घटाभा-
वकृतिघटत्वमदशायां घटाभावसत्त्वादिंद्रियसंबंधविशेषणतया घटाभावप्रत्यक्षापत्तिः। मन्मते च
घटोपलंभसत्त्वेनानुपलब्धेरभावात् न तत्प्रत्यक्षापत्तिरित्यनायत्या प्रमाणांतरमावश्यकमित्याशा-
येन मीमांसक[illegible]शंकते॥ नन्वेवमिति॥ एवमनुपलब्ध्याख्यप्रमाणमनंगीकृत्य इंद्रियसंबंधविशे-
षणतायाः अतिरिक्तायाः प्रत्यासत्तित्वे॥ योग्यानुपलब्धेरपीति॥ चक्षुषा घटाभावप्रत्यक्षे न

पेक्षत्वतातिरिक्तत्वेनाभ्युपगतायायोग्यानुपलब्धेः सहकारित्वं कल्प्यते। घटाभाववतीत्यत्र घटोपलंभेन योग्यानुपलब्ध्य-

तामिंद्रियादेवन चाभावप्रत्यक्षापत्तिरिति भावः। ननु चैवं किमवशिष्टमनुपलब्धेः प्रमाणत्वेन प्रत्युतेंद्रियस्य का-

रणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनाधिक्यमिति चेन्न। विजातीयप्रमाकल्पनापेक्षया प्रत्यासत्त्यंतरकल्पनाया

न्याय्यत्वाद्धि। पारवल्लाचेन प्रमाणत्वासंभवस्य पूर्वमेव दर्शितत्वाच्चेति।। अभावग्रहे। अभावलौकिकप्र-

त्यक्षे। अथ के यमभावग्रहे हेतुः।। योग्यस्यानुपलब्धिरिति वा योग्येऽनुपलब्धिरिति वा योग्यानुपल-

ब्धिशब्दार्थ इत्यर्थः। तत्राद्यमाशंकते।। योग्यस्येति।। जलपरमाणाविति।। महत्त्वाभावे प्रत्यक्षानुरोधेन

विजातीयस्य द्रव्यसंयुक्तविशेषणताया आवश्यमंग। कार्यतया पृथिवीत्वाभावस्यापि ग्रहापत्तिरिति भा-

वः। दूषणांतरमाह।। तत्त्वत इति।। द्वितीयमाशंक्य निराचष्टे।। योग्य इति।। स्वैकदेशिमतं दूषयितुं तन्मत-

मुपन्यस्यति।। यत्त्विति।। वाय्वादाविति।। वाय्वोरयोग्यत्वादिति भावः। परमाणौ महत्त्ववद्रूपस्य हानापत्तेश्चेति द्र-

ष्टव्यं।। अनुद्भूतेति।। वायुर्नीरूपवान् परमाणुर्न महानित्यादिप्रत्यक्षप्रतीतेर्विलोपप्रसंगादित्यर्थः।

योग्यश्चासावनुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह।। अयोग्येति।। योग्येत्यस्य विवरणं सह-

कारीति।। तथा चाभावप्रत्यक्षसामग्रीविशिष्टा प्रतियोग्यनुपलब्धिरेव योग्यानुपलब्धिरित्यर्थः। अत

एव सहकारिसंपन्नत्वरूपयोग्यत्वविशेषणादेव।। योग्यतेति।। योग्यसन्निकर्षस्यैवाभावप्रत्यक्षसा-

जल१ मग्र्याघटकत्वेनैव परमाणौ न पृथिवीत्वाभावग्राहकत्वं। उद्भूतरूपाभाववति वायौ तस्यासंभवादित

+ ग्रह इति भावः। ननु महत्त्वोद्भूतरूपवद्विशेषणताभा: पृथिवीत्वाभावग्राहकत्वे गौ

पि

अ१

[illegible]तरूपाभाव +१

तर्कसं° २५

+ एवं गुणादौ पृथिवीत्वाभाव प्रत्यक्षानुपपत्तिः तत्र इंद्रियसंनिकृष्टमहत्त्वादिमद्विशेषणताविहेरेत् ४

प्रत्यक्ष° २५

भावत्व

तत्रेंद्रियसंबंधे विशेषणतायाः एव योग्यसन्निकर्षत्वसंभवे॥ एवं मनस्यणूद्भूतरूपाभावस्यासंस्यादत आह॥ उद्भूतरू
पाभावेत्यिति॥ उद्भूतरूपाभावग्रहेत्यर्थः॥ तथा च अद्भूतरूपमपि वश्यमहत्त्वं निवेशनीयमिति भावः॥ अत
महत्त्वविशेषणात्॥ तेनद्रूह:॥ उद्भूतरूपाभावग्रहः। वायावित्यत्र तद्ग्रह इत्यनुषज्यते॥ ननु महत्त्वाभावग्राह
कः कः सन्निकर्षः। एवमन्योन्याभावग्राहकः योग्यः सन्निकर्षः क इत्यत आह॥ एवमन्यत्रापीति। महत्त्वा
भावादावपीत्यर्थः॥ मौलाभावे इंद्रियसन्निकृष्टोद्भूतरूपवद्विशेषणतायोग्यः सन्निकर्षः॥ ननु कुत्रचि
दिंद्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता। कुत्रचिदिंद्रियसन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणतास
न्निकर्ष इत्यत्र किं नियामकं मह आह॥ कार्यबलादिति॥ तत्र तत्तदभावग्रहानुरोधादित्यर्थः॥ ननु पिशा
चात्यंताभावादीनामपि प्रत्यक्षापत्तिस्तत्र योग्यसन्निकर्षसत्त्वेन योग्यानुपलब्धिसत्त्वादत आह॥ पिशा
चात्यंताभावस्येति॥ अयोग्यत्वादिति॥ प्रत्यक्षे विषयस्य हेतुतया अभावप्रत्यक्षे योग्याभावस्य हे
तुत्वोपगमाद्दोषाभावः॥ अयोग्यप्रतियोगिकस्यापि स्तंभे पिशाचभेदस्य प्रत्यक्षत्वात्स्यात्। अत्यंताभा
व एव पृच्छति॥ को पुनर्योग्य इति॥ उत्तरयति॥ योग्यमात्रेति॥ पिशाचस्यायोग्यत्वेन योग्यप्रतियोगिकत्वा
भावादेव न तदभावप्रत्यक्षमिति भावः॥ घटपिशाचान्योन्याभाववारणाय मात्रेति॥ अतीन्द्रियान्यप्रति
योगिताकस्याभावात्। एवमेव गुरुत्ववत्त्वाभावप्रत्यक्षापत्तिरिमपि तदर्थः॥ ननु वायौ रूपसामा
न्याभावप्रत्यक्षानुपपत्तिः तस्यातीन्द्रियप्रतियोगिकत्वेन योग्यमात्रवृत्तिप्रतियोगिताकत्वाभावात्

+ गुणादौ पृथिवीत्वाभावग्रहे तु इंद्रियसंनिकृष्टविशेषणत्वे वा॥ अन्योन्याभावग्रहे पृथिवीभेदादौ इंद्रियसन्निकृष्टमहत्त्वादिमद्वि
शेषणत्वे वा॥ योग्यः सन्निकर्षः ५०

71

एवमेतद्रूपत्ववदत्यंताभावप्रत्यक्षापत्तिश्चेयस्य रसादावयोग्यधर्मेति। पिशाचवद्घटः पिशाचान्यतरत्वा
त्वादौ। नायोग्यधर्मता तावेन न तदवच्छिन्नाभावप्रत्यक्षमिति भावः॥ वस्तुतस्तु योग्यमात्रप्रतियोगिके
योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं विशेषणमित्येव पाठः। योग्यमात्रप्रतियोगिके ऽत्यन्ताभावे योग्यधर्मा
वच्छिन्नप्रतियोगिताकत्वं योग्यत्वेनेति यावत्। तत्र च भूतले द्रव्यसामान्याभाववारणाय योग्यमात्रप्र
तियोगिकत्वं एतद्रूपत्ववदत्यंताभाववारणाय योग्यधर्मेति। रूपरसमान्याभावप्रत्यक्षं नेष्यत एवेति। वायौ
तदसंग्रहो [illegible] न दोषाय॥ एतद्रूप एतद्रूपत्वान्यतरत्वावच्छिन्नाभाववारणाय योग्यधर्मेत्य
स्य योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थ इत्यवधेयं॥ ननु पिशाचवद्भेदेऽन्योन्याभावोऽप्य
योग्यत्वाद्देव न गृह्येतेति वाच्यं॥ तत्रान्योन्याभावे रूपायोग्यतानवच्छेदकयोग्यप्रतियोगिकत्वं॥ स्तंभः पिशाच भेद
वत्तानापत्तेः। पिशाचवद्भेदग्रहापत्तेरित्यत आह॥ एवमन्यत्रापीति॥ अन्योन्याभावेपीत्यर्थः। अनुग
मानुसारेणेति। तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वमेव तत्तदन्योन्याभावे योग्यत्वमित्यर्थः। अत एव॥
का पुनरत्यंताभावे योग्यतेति सामान्यत एवात्यंताभावे योग्यता निरुक्ता॥ अन्योन्याभावे त्वननुग
तैवेति ध्येयं॥ तथैवेति। अत्यंतान्योन्याभावे इत्यर्थः। तद्भिन्नमिति। अत्यंताभावे योग्यमात्रे सादिरूपा ना२
अन्योन्याभावेत्यादि। अन्योन्याभावत्वमित्येवं रूपानानैव योग्यतेत्यर्थः॥ [illegible]मिति॥ अंगीकारार्थम
व्ययं॥ गुणायोग्यतावदिति॥ यथा रूपरसादौ तच्चादिद्रव्ययोग्यत्वं नैकं तथा प्रकृतेपीत्यर्थः। केचित्तु॥

72

°पजातीयचक्षुःसंयोगाश्रयविशेषणतया। अभावग्राहकत्वेननपरमाणौपृथिवीत्वाभावग्रहः। पिशाचात्यन्ता
भावादिप्रत्यक्षवारणायतुगुरुत्वादिवक्तव्यमित्याशयेनतत्तदभावत्वेनैनसाक्षात्कारंप्रतिप्रतिबंधकत्वांगीकार
त्वा३ इत्याकूतः॥ तदसत्। परमाणौमहत्वाभावप्रत्यक्षानुपरोधेनविजातीयचक्षुःसंयोगस्यावश्यकत्वात्तेनतत्रपृथिवी क्षु३
त्वाभावप्रत्यक्षवारणासंभवात्। एवंकिंचचक्षुरादिकंत्व[illegible]ति॥ अथकिमिदमिति। तैजसमिति॥
आलोकघ्राणादावतिव्याप्तिवारणाययथायथमुक्तयोपादानं। चक्षुस्तैजसत्वेविवादात्। रूपग्राहक
मिति॥ रूपग्राहकमात्रोक्तौमनस्यतिव्याप्तिवारणायरतोमहदिति॥ महत्त्वमात्रोक्तौघ्राणादावतिव्या
७६ प्तिरतोरूपग्राहकमिति। रूपग्राहकमहत्त्वोक्तौआत्मनिअतिव्याप्तिरतः इंद्रियमिति॥ अत्रकेचित्। चक्षुः
अप्राप्यप्रकाशकारित्वेचंद्रमसोऽग्रहणानुपपत्तेः। शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्च। अप्रा
प्यकार्येवतद्वाच्यं॥ एवंचाप्राप्यप्रकाशकारित्वाविशेषाद्दूरत्वकुमेवतादितिपार्थिवत्वमेवतस्येत्याकूतः॥
तदसत्॥ चक्षुः अप्राप्यप्रकाशकारित्वेनिमीलितनयनस्यापिचाक्षुषापत्तेः। प्राप्यकार्येवतद्वाच्यं॥
चक्षुषःतैजसत्वेनातिशीघ्रगामितयाचंद्रमसासंयोगउपपद्यतएवशाखाचंद्रमसोस्तुल्यकाल
ग्रहणंसंसिद्धं॥ मयाप्युमपच्छतपत्राणिभिन्नानीतिवत्। तथाचगोलकस्यघटादौसंयोगाभावेनाति
रिक्तंतैजसंचक्षुःस्वीकार्यं॥ एवमन्यत्रापिबोध्यं। वायवीयमिति। वायवीयत्वमात्रंवायाविंद्रियत्व
मात्रंचचक्षुरादावतिव्याप्तमितिभिन्नितोपादानं। त्वचोवायवीयत्वेविवादादाह। रूपाग्राहकमिति।
स्पर्शग्राहकमिति॥ चक्षुर्मनआत्मनांवारणायविशेषणत्रयोपादानं॥ आप्यमिति। जलंचचक्षुरादावतिव्या

73

त्तियारणाय विशेषणद्वयोपादानं ॥ रसनस्याप्यतो विवादादाह ॥ रसग्राहकमिति ॥ चक्षुर्मनआत्मनां वारणेरुणाय यथाय
थं विशेषणद्वयोपादानं ॥ पार्थिवमिति ॥ व्याचष्टे इति ॥ स्पर्शवत्वादीन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सतीज्ञानका
रणमनःसंयोगाश्रयत्वं ॥ आत्मनि अतिव्याप्तिवारणाय सत्यन्तनिवेशः ॥ शब्दरूपविशेषगुणसत्वाच्छ्रोत्रेव्या
प्तेः । शब्देतरेति गुणविशेषणं ॥ चक्षुषि तादृशरूपस्य सत्वादुद्भूतेति ॥ उद्भूतत्वं नीलत्वादिव्याप्यानुद्भूतत्वाभ
च्छिन्नाभावकूटत्वमेव तस्य च संयोगादिसाधारण्यात्यान्त दूरादावव्याप्तेर्विशेषेति ॥ चक्षुरादेः सत्वा
द्गुणेति ॥ कालौनादावतिव्याप्ते ज्ञानकारणेति ॥ इन्द्रियावयवसंयोगस्यापि प्रत्यक्षकारणतया इन्द्रियावयवे
तिव्याप्तिवारणाय मनःसंयोगेति ॥ श्रोत्रं लक्षयति कर्णेति ॥ घटावच्छिन्ननभसोपि श्रोत्रत्वापत्तेः
कर्णशष्कुलीति ॥ नभसः श्रोत्रत्वे विवादादाह ॥ शब्दग्राहकमिति ॥ मनो लक्षयति ॥ निस्पर्शमिति ॥ मनो वै णु६
भववादिनां मीमांसकानां मतं दर्शयति ॥ अत्र मीमांसका इत्यादि ॥ अणुत्वात्तावसिद्धावपि न विभुत्व
सिद्धिरत आह ॥ किं त्विति ॥ निस्पर्शत्वं गुणादौ व्यभिचारीति द्रव्यत्वादीति ॥ द्रव्यत्वं घटादौ व्यभिचारीति
विशिष्टहेतुत्वानुपपादनं ॥ नन्वेतन्मते मनसस्त्वस्य निस्पर्शाणुत्वरूपासत्त्वेन पक्षतावच्छेदकासिद्धिरत
आह ॥ मनस्त्वं चेति ॥ आत्मन्यतिव्याप्तिवारणायात्मान्यत्वे सतीति ॥ संयोगाश्रयत्वं कालादावपि इ
ति ज्ञानासमवायिकारणेति ॥ चक्षुर्मनोयोगस्य ज्ञानकरणत्वात् ॥ ज्ञानकरणसंयोगाश्रयत्वं चक्षु
रादावतिव्याप्तिरित्यतः समवायीति ॥ ज्ञानासमवायिकारणं त्वात्ममनःसंयोग एवेनातिव्याप्तिः ॥ इति

75

तर्कप्र०३८॥

जसच्छ ३८

केचित्तु ॥ नवानामतेऽदृष्टाद्यविशेषाद्धृतत्वाद्भैर्मनस्त्वेन पक्षतावच्छेदकस्यैक्याज्जावात् ॥ कथं पक्षतावच्छेदका
वच्छेदेनानुमितिः ॥ तत्रैव विभुत्वे बाधेन कथं वा तत्रैव विभुत्वानुमितिरत आह ॥ मनस्त्वं चेति ॥ नानासमवायि
कारणेभिंति ॥ पुरुषांतरीयात्मीयत्वक्षवारणाय तत्तदात्मनामानसत्वावच्छिन्नं प्रति तत्तदात्मनः तत्तदात्मनःसं
योगत्वेन हेतुतायामनंतत्कोटौ नामवच्छेदककोटौ निवेशो गौरवेण लाघवे नैव मनःसिद्धिः न्यच विजातीय
संयोगत्वेन तस्य हेतुतया न तत्र मनसो निवेश इति वाच्यं ॥ तथा समवायेन विजातीय संयोगस्य विजाती
यसंयोगसंबंधेनैमनसो वा हेतुत्वमिति विनिगमनाविरह इतिस्तावदस्याद्रुः ॥ विभुत्वे मनसो विभुत्वे ।
संयोगानुपपत्तेरिति । न या वोपदर्शितानुमाने पक्षतावच्छेदकासिद्धिर्बाधश्चेति भावः ॥ कर्मज ॥ यथा
श्येनक्रियया श्येनवृक्षसंयोगः । अवयवसंयोगजः । कारणाकारणसंयोगात्कार्याकार्यसंयोगः ॥ हस्त
तरुसंयोगात्कायतरुसंयोग इत्यर्थः ॥ न च विभ्वोरिति ॥ मूर्त्तेतरद्रव्यत्वं विभुत्वं स्पर्शादेर्वाच्छिन्नं प्रति २५
मूर्त्तत्वेन कारणतया मूर्त्तत्वाभावेन आत्मनि न कर्मोत्पत्तिरितिभावः ॥ अनयोः आत्ममनसोः । तत्संयोगजः
अवयवसंयोगजः । मानाभावादिति ॥ नित्यसंयोगग्राहकप्रत्यक्षादेरसत्त्वात् ॥ अनुमानस्य चाप्रयोजकत्वादित्यर्थः ।
साधकाभावमुक्त्वा बाधक[illegible]मप्याह ॥ संयोगत्वावच्छेदेन । संयोगत्वावच्छिन्नं प्रति तद्व्याप्यत्वेन हेतुतया ॥ कार्य
तावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगाङ्गीकारे वाच्यं ॥ कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात् ॥ अथवा जन्य
त्वनिवेशे गौरवमेव नस्वीकारे ज्ञाति कृत्स्नं तर्क इति भावः ॥ ननु समवायेन रूपं प्रति सामानाधिकरण्यसंबंधेनावयवरू

75

पादीनां हेतुतया कपालगंधादावपि रूपोत्पत्त्यापत्तेर्जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वावश्यकत्वे तया संयोगत्वा
वच्छिन्नं प्रति तद्धेतुत्वे मानाभाव इति न दूषितं गौरवमत आह ॥ अजन्यो जनकं चेदिति ॥ इदं च तुल्यसाधकमनुमान
मित्यर्थः ॥ अनुकूलतर्काभावादित्यर्थ इति भावः ॥ संयोगत्वावच्छेदेनेति ॥ संयोगस्य द्रव्यजन्यत्वव्याप्यत्वेन नित्यत्वप्र
संगस्वीकारे तादृशनियमभंगप्रसंगादिति भावः ॥ ननु तादृशनियमे मानाभाव इत्यत आह ॥ अजन्यो जनकं चेन्नेति
परे नानातर्कविचारणैकमतिना यत्किंचिदुक्तं मया तत्सम्यक् हृदि भावयन्तु सुधियः सारार्थसंग्राहकाः ॥ हृद्येतद्ध
दिधारयेद्दीपिं जनः संजायते सोऽचिराद्वादीन्द्रः परवादिदूषणपाशताधामैकदक्षः कृती ॥ १ ॥ ॥ इति श्रीमौद्गला न्मुकुंद
मिकथ्यमकुंटो राजनीराजनीराजनीराजितपदद्वन्द्वन्यायवागीश श्रीदीक्षित श्रीकृष्णविरचितायां न्यायसिद्धान्तम
ञ्जरीदीपिकायां प्रत्यक्षखंडं समाप्तिमगमत् ॥ ॥ वैकुंठाधिपतेरंशो श्रीव्यंकटाचलवासकः ॥ प्रत्यक्षखंडं लिख
नेतव प्रीतोऽस्तु वत्सलः ॥ १ ॥ ॥ प्रत्यक्षनिरूपणानंतरमुपजीव्योपजीवकभावसंगत्याऽनुमाननिरूपणमा
ति जानीते ॥ अथेति ॥ अथशब्दोऽत्रानंतर्यवचनः । तत्र क्रमस्य प्रत्यक्षनिरूपणस्यार्थादवधित्वमवगम्यते ॥ अत ए
व सिद्धत्वमपि । निरूप्यत इति वर्त्तमानार्थकलट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः ॥ एवं च
सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायेन मलिननतवपुः स्नायादित्यत्रेवात्रापि प्र
त्यक्षानुमाननिरूपणयोरुपजीव्योपजीवकभावलाभः । तथा चोपजीवकत्वसंगत्याऽनुमाननिरू
पणमावश्यकमिति भावः ॥ अत्र यद्यपि अनुमितिकरणत्वेनानुमानज्ञानेन प्रत्यक्षज्ञाना

76

तर्क०प्र०३८

+ सविशेषणे विधिनिषेधौ सति विशेष्ये बाधे विशेषण
मुपसंक्रामत इति न्यायेन २

अनुमान०३ ~~[illegible]~~

पेक्षेति तन्निरूपणयोरुपजीव्योपजीवकत्वात्संगतत्वस्तथापि सविशेषणे हीति न्यायेन निरूप्यप्रत्यक्षानुमानयोरुप
जीव्योपजीवकत्वावगमः ॥ अत्र चोपजीवकं निरूप्यमुपजीव्यनिरूपणादुपजीवकत्वादिसंगतेरानन्तर्यनियामकत्वे
पि स्वतन्त्रेच्छस्येति न्यायेन इच्छाया नियामकत्वान्न पौर्वापर्यनियम इति ध्येयं ॥ ननु निरूपणप्रतिज्ञायाः विषयान्तरसंचा
रराहित्यरूपशिष्यावधानप्रयोजनकत्वेऽपि मङ्गलपरत्वादिनिरासाय संगत्यभिधानस्यैवोचितत्वं ॥ ननु संगतिप्रद
र्शनस्यापि व्यर्थत्वादिति चेन्न ॥ द्विविधं शिष्यावधानं अनुपेक्षणीयत्वरूपं विषयान्तरसंचाररराहित्यरूपं च ॥ तत्रा
संगतत्वज्ञाने नोपेक्षासंभवात् । संगतिप्रदर्शनमावश्यकं ॥ तथा च संगतिज्ञाने सति असंगतत्वज्ञानोपेक्षत्वात् नासं
गतत्वज्ञानप्रयुक्तोपेक्षणीयत्वं ॥ द्वितीयं च निरूपणप्रतिज्ञयेति परमरहस्यमत्रानुसंधेयं ॥ ग्रन्थमध्ये मङ्गल
करणादथशब्दो मङ्गलार्थ इत्यपि कश्चित् ॥ आनन्तर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं तथा च प्रत्यक्षनिरू
क्षण पणध्वंसाधिकरणवृत्तिवर्तमाननिरूपणविषयमनुमानमिति शाब्दबोधः ॥ तत्र लक्षणस्वरूपप्रामाण्यादि
ण९ प्रकारकनिरूपणविषयेऽनुमाने ॥ करणत्वमात्रस्य कुठारादौ मितिकरणत्वस्य प्रत्यक्षादावतिव्याप्तिवारणाया
नुमितिकरणत्वमिति विशिष्टोपादानं ॥ ननु अनुपश्चान्मितिज्ञानं मितिव्युत्पत्त्या किंचिज्जन्यज्ञानकरणत्वं लक्ष
णं लब्धं तच्चातिप्रसक्तमेवेत्यत आह ॥ अनुमितित्वं चेति तथा च न किंचिज्जन्यज्ञानत्वमनुमितित्वं अपितु जाति
विशेष एव ॥ तदवच्छिन्नत्वं च न प्रत्यक्षादाविति नातिव्याप्तिरिति भावः ॥ यद्वा नानुव्यावृत्तिर्व्यवहारो वा लक्षणस्य
प्रयोजनमिति नियमेनेतरभेदानुमापकमेवैतल्लक्षणं ॥ इतरभेदानुमानं च अनुमानं प्रत्यक्षादिभ्यो भिद्यतेऽनु
मितिकरणत्वात् । यन्नैवं तन्नैवं ॥ यथा प्रत्यक्षादीत्याकारकं ॥ तत्र चानुमितेः प्रत्यक्षप्रमितित्वेन लक्षण्याज्ञाने

7A

५२ प्रत्यक्षप्रमाणेपि अनुमितिकरणत्वग्रहसत्त्वेन प्रत्यक्षभेदासत्त्वे न व्यभिचार[illegible]नापत्तेरिति लक्षणप्रयोजनमनुपपन्नमित्यत आह ॥ अनुमितित्वं चेति ॥ प्रत्यक्षप्रमित्यनंतरमनुमिनोमीत्यनुव्यवसायानुदयात् ॥ प्रत्यक्षव्यावृत्तमनुमितित्वमेव तादृशं ॥ तच्च न प्रत्यक्षत्वं प्रत्यक्षप्रमितिविलक्षणप्रमितिकरणत्वहेतुकमितरभेदानुमानं सुकरमेवेति न कोपि दोषश्चेत्सारं ॥ केचित्तु ॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वमेवानुमितिकरणत्वं वाच्यं ॥ तत्र च व्याप्तिज्ञानत्वादेरेवागमकत्वस्य संभवेनाधिक्यस्य वैयर्थ्यमितीतरभेदानुमानमनुपपन्नमित्यत आह ॥ अनुमितित्वं चेति ॥ तथा च जातिरूपानुमितित्वावच्छिन्नकरणत्वमेव लक्षणं न तत्केरूपमिति न व्यर्थत्वशंकापीत्याहुः ॥ नन्वनुमानत्वमनुमितिकरणत्वं तथा चेतरभेदानुमाने पक्षतावच्छेदकहेत्वोरैक्ये अन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया हेतोः साध्याधिकरणवृत्तित्वरूपव्याप्तिज्ञाने जायमाने एव तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृत्तित्वग्रहसत्त्वेन पक्षतावच्छेदकाश्रये साध्यसिद्धेः सिद्धसाधनतापत्तिरिति तयोर्भेद आवश्यकः ॥ यदि च हेतोः साध्याधिकरणवृत्तित्वज्ञानेपि पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुदयान्न सिद्धसाधनतावकाशः ॥ अन्यथा पृथिवीतरेभ्यो भिद्यते गंधवत्त्वादित्यत्रापि पृथिवीत्वाधिकरणे घटादावितरभेदस्य निश्चितत्वादनुमित्युच्छेद एव स्यात् ॥ किंच व्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिकरणतया साध्यसामानाधिकरण्यस्य तत्राघटकत्वेन न सिद्धसाधनमिति विज्ञायेत तथाप्युद्देश्यतावच्छेदकविधेययोरैक्ये शाब्दबोधानुपपत्तिरेव ॥ अन्यथा दंडवान् दंडवानित्यादेर्निराकांक्षत्वानुपपत्तेरिति ॥ मैवं ॥ अनुमानपदवाच्यत्वस्य [illegible]तावच्छेदकत्वेन कुत्राप्यनुपपत्तेरभावादिति ॥ केचित्तु ॥ नामार्थयोरभेदातिरिक्तसंबंधेनानन्वयबोधानभ्युपगमादनुमितिकरणत्वस्यानुमितिसंबंध्य

तर्क॰प्र॰३१

नु१ किंच२

भिन्नं करणमित्यर्थः॥ ज्ञानपूर्वकमाप्यानुमितिः प्रकरणस्फुटत्वकरणं बोध्यते। तथा चानुमितिकरणमनुमितिसं
बंध्यभिन्नं करणमिति शाब्दबोधो नानुपपन्नः॥ करणतायाः कार्यघटितत्वेनानुमितिकरणत्वस्य करणपदा
र्थत्वेपि अनुमितिकरणमनुमितिसंबंध्यभिन्नानुमितिकरणमिति शाब्दबोधोपि नानुपपन्नः॥ विधेयतापर्या
प्त्यधिकरणोद्देश्यतावच्छेदकयोरैक्य एव शाब्दबोधानुपगमात्॥ अन्यथायं घटवान् रक्तोयं घटवानित्यादिबोधानुपपत्ते
रित्याकूतः॥ नन्वनुमितित्वस्यैवानुमितिलक्षणत्वे लक्षणलक्ष्यतावच्छेदकयोरैक्यमित्यत आह॥ जन्यज्ञा
नेति॥ जन्यज्ञानजन्यत्वाव्यभिचारिणी जन्यशब्दधीजन्यत्वव्यभिचारिणी च या जातिस्तद्वत्त्वमेवानुमितिलक्षणं
र्थः। जन्यज्ञानं व्याप्तिज्ञानं तज्जन्यत्वाव्यभिचारिणी तज्जन्यत्वव्याप्य जन्यशब्दधीजन्यत्वस्य व्यभिचारिणी च या जा
तिरनुमितित्वं तद्वत्त्वमादाय लक्षणसमन्वयः। तथा च तस्य स्वरूपतः लक्ष्यतावच्छेदकत्वेन तादृशजातित्वेन च ल
क्षणत्वेन न तयोरैक्यमिति भावः। ननु जातिमदनुमितित्वमेव लक्षणमस्तु किमेतावद्विशेषणेनेत्यत आह॥ जन्यस
त्वेनेति॥ अतिव्याप्तिं वारयति॥ ज्ञानजन्यत्वेति जन्यज्ञानाजन्यस्येत्यर्थः॥ नित्ये ईश्वरसाक्षात्कारे नदीति॥ तत्सत्त्वे
प्तेत्वं जन्यधीजन्यत्वं जन्यज्ञानजन्यत्वं तथा च प्रत्यक्षत्वस्य जन्यज्ञानजन्यत्वाव्याप्यत्वान्नातिव्याप्तिरिति भावः। तत्रा
पि जन्यज्ञानजन्यत्वाव्यभिचारित्वं दुर्लभेपि॥ अतिव्याप्तिमुपपादयति॥ तद्धीति चाक्षुषत्वं हीत्यर्थः॥ तदाश्रयाणामि
ति॥ चाक्षुषत्वाश्रयाणामित्यर्थः॥ जन्यपदोपादाने च चाक्षुषत्वस्य जन्यज्ञानाजन्ये निर्विकल्पके सत्त्वेन जन्य
ज्ञानजन्यत्वाव्यभिचारित्वाभावान्न तदादाय प्रत्यक्षे अतिव्याप्तिरिति भावः॥ जन्यजन्यत्वाव्यभिचारित्वस्योक्तावपि चा
क्षुषत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वात् तथैवातिव्याप्तिरित्यतः ज्ञानेति॥ ज्ञानत्वाव्यभिचारित्वोक्तोप्र

० =यदि च ज्ञानपदोपादानेपि कालोपाधिविधया जन्यज्ञानजन्यत्वं निर्विकल्पकेपीति चाक्षुषत्वमादायोक्तदोषतादवस्थ्या=
=ज्जन्यज्ञाननिरूपितासाधारणजन्यता वक्तव्या निवेशनीया। तथा च ज्ञानपदानुपादानेपि जन्यज्ञानत्वावच्छिन्नं प्रत्येव शरीरत्वेन=
हेतुतया शरीरादिनिरूपिताऽसाधारणजन्यत्वं निर्विकल्पके इति तद्वैयर्थ्यमिति विभाव्यते तथापि चाक्षुषत्वावच्छिन्नं प्रति चक्षुषो=

~~प्रकाश~~ ३१

=हेतुतया जन्यचक्षुरादिजन्यत्वे व्याप्यत्वं चाक्षुषत्वस्येति तद्दो=
=षवारणाय ज्ञानपदनिवेशः। तथा च जन्यज्ञाननिरूपितासाधार=
णजन्यत्वमित्यर्थ इति न काप्यनुपपत्तिः॥ जन्यत्वाव्यभिचारिज्ञा=
नत्वाव्यभिचारिजन्य =०

त्यक्षादेरवारणात्॥ जन्यज्ञानजन्यत्वाव्यभिचारीत्यंतं॥ जन्यज्ञानजन्यत्वसामानाधिकरण्येत्युक्तौ स्वज्ञानत्वमप्र
त्वादेरेवावरणाद्व्यभिचारीति॥ ननु तथापि जन्यज्ञानजन्यत्वाव्यभिचारिजातिमदनुभवत्वं स्यात्तोप
मत्वे व्यभिचारात्यत्वेनेत्यत आह॥ उपमितित्वेति॥ उपमितित्वशब्दत्वयोरतिदेशवाक्यार्थज्ञानपदज्ञानादिरूपज
न्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरिति भावः॥ अतिव्याप्तिं निराकरोति॥ तद्भिन्नेति॥ उपमितित्वशाब्दत्वरहि
तेत्यर्थः॥ यथोक्तज्ञानेति॥ जन्यपदज्ञानेत्यर्थः॥ तदेवोपपादयति॥ उपमितीनामिति॥ अतिदेशेति॥ गोसदृ
शो गवय इति गवयपदवाच्य इत्याकारकशब्दविषयज्ञानजन्यत्वादित्यर्थः॥ सर्वासामित्यनेनोपमितित्वस्य ता
दृशज्ञानजत्वव्याप्यत्वं लब्धं॥ एवं च व्यभिचारित्वस्य तत्राभावान्नातिव्याप्तिरिति भावः॥ शाब्दानुभवानां शाब्द
बोधात्मकानुभवानां॥ क्वचिच्छब्दानुभवानामिति पाठः॥ तत्र शब्दप्रयोज्यानुभवानामित्यर्थः॥ नन्वत्रागमजन्य
त्वोपादाने वैयर्थ्यमित्याशयेनाशंकते॥ न चेति॥ व्यभिचारीत्येवकारेणाप्रमजन्यत्वव्यवच्छेदः॥ उत्तरयति॥ अ
नुमितित्वस्येति॥ असंसर्गादीति॥ न धावतादिराजात्यप्रसिद्ध्या॥ तद्वलमादाय नव्यक्षणगमनसंभव इति भावः॥
न चेति॥ निषेधति॥ तस्येति॥ न च ज्ञानवृत्तिवैजात्यस्येत्यर्थः॥ शब्देति॥ आत्मा शरीरादिभ्यो भिन्नः॥ तत्त्वमसी
त्यादिवाक्यविशेषविषयकेत्यर्थः॥ इदं च मनने शब्दस्याप्युपनीतज्ञानमभ्युपेत्य॥ अव्यभिचारित्वादीति॥ तथा च
तस्य शब्दज्ञानजन्यत्वव्यभिचारित्वाभावादेववारणमिति भावः॥ ननु निदिध्यासनोपक्षीणं मननं न तत्त्वज्ञान
जनकमतस्तस्यापि शब्दज्ञानजन्यत्वव्यभिचारित्वमेवेत्यत आह॥ जातिपदमिति॥ वाकारश्च तत्त्वज्ञानस्य म
ननजन्यत्वानंगीकारेपि न क्षतिरिति सूचनाय॥ यद्वा ननु शरीरादिभिन्नत्वेन श्रुतस्यात्मनः युक्तिभिरनु

80

तर्कसं० ४०

ना० २

अनु० ४०

चिंतनंमननं ॥ तदुक्तं ॥ मंतव्यश्चोपपत्तिभिरिति ॥ तच्चानुमानादिजन्यमनुमित्यात्मकमेव ॥ अनुमितौऽपनीतभाननिबं
धेनतस्य शब्दविषयकत्वात्संवादिलिंगोपहितलैंगिकत्वानेप्रमाणत्वावेन लिंगविषयापि शब्दस्यानुमितौभा
नासंभवाच्च ॥ तथाच शब्दज्ञानजन्यत्वव्यभिचारित्वम् क्षुण्णमेवेत्यत आह ॥ जातिपदंचेति ॥ चाकारश्चमनन
२क स्यशब्दविषयत्वानभ्युपगमेपि न क्षतिरिति सूचनायेति ॥ केचित्तु ॥ शब्दविशेषविषयकेति ॥ श्रोतव्यो मंत
व्यश्चेत्यादिवेदवाक्यरूपशब्दज्ञानेत्यर्थः ॥ जन्यशब्देति ॥ जन्यत्वप्रयोज्यत्वं जन्यशब्दज्ञानप्रयोज्यत्वाव्यभि
चारित्वादित्यर्थः ॥ तथाच जन्यशब्दधीजन्यत्वव्यभिचारित्वपर्यवसन्नं जन्यशब्दज्ञानप्रयोज्यत्वव्यभिचारित्वमेवविवक्ष
णीयं तत्त्वज्ञानत्वनिवेशात्तस्यच शब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव नातिव्याप्तिप्रसंगः ॥ ननु तत्त्वत्वादिवारणाय
जातिपदस्य मानसत्वादिजातिपरत्वावश्यकत्वेन तत एवात्रापि अतिप्रसंगवारणे किं न्यायतत्पदस्य प्रयोज्यत्वपर पद २
त्वमंगीकृत्य तादृशातिव्याप्तिवारणेनेत्यत आह ॥ जातिपदंचेति वाकारश्च जन्यत्वस्य प्रयोज्यतात्पर्येपि न क्षतिरि
ति सूचनायेत्यर्थमाहुः ॥ तदसत् ॥ शब्दज्ञानप्रयोज्यत्वव्यभिचारित्वविवक्षणे वेदादिवाक्यरूपशब्दज्ञा
नजन्यादृष्टजन्यत्वस्यानुमितावपि सत्त्वेनानुमितित्वस्यापि तत्प्रयोज्यत्वव्यभिचारित्वासावादसंभवापत्तेरिति ॥
अत एवेति ॥ जातिपदस्य मानसत्वादिपरत्वादेवेत्यर्थः ॥ तत्किंचेति ॥ आराध्यत्वेन ज्ञानं च किं ॥ आरा
धनाच गौरवितप्रीतिहेतुभूता क्रिया ॥ वै फलावश्यंभावनिश्चयः अर्जितत्तल्लक्षणेबोध्य ॥ आराध्यव्यक्ति
ज्ञानं विना आराध्यत्वेन ज्ञानासंभवादेवं फलज्ञानं विना फलावश्यंभावनिश्चयासंभवात् भक्तिश्च श्रद्धाल
पोऽजन्यज्ञानजन्यताव्यभिचारित्वस्य सत्वात् जन्यशब्दधीजन्यत्वव्यभिचारित्वस्यापि सत्वात्तत्रातिव्याप्तिः ॥

जातिपदस्यमानसावृत्तित्वपरत्वेचएतयोर्मानससवृत्तित्वेननातिप्रसंगइति॥ननुभक्तित्वमनुद्भवत्वादेर्जातित्वेमाना
भावादेवनातिव्याप्तिरित्यतआह॥आदिरिति॥आदिनाआपत्तित्वपरिग्रहः॥आपाद्यत्वस्यविधेयतानिरुक्त
त्वेमानाभावेनवह्न्यनुमित्यनन्तरमपिवह्निमापादयामीतिप्रतीत्यापत्तेः॥तादृशानुव्यवसायप्रतिवह्निविधेय
कापत्तित्वेनैवहेतुतायामापत्तित्वजातेरावश्यकत्वेनतद्वारणायजातिपदस्यमानसावृत्तिजातिपरत्वमाव
श्यकमितिहृदयं॥अनुभवपदव्यावृत्तिमाह॥अनुभवपदमिति॥स्मृतिवारणायेति॥स्मरामीत्यनुगतप्र
तीत्याअनुभवसामग्रीप्रतिबध्यतावच्छेदकतयासिद्धस्मृतित्वमादायातिप्रसंगवारणायेत्यर्थः॥स्मृति
वा~~स्यत्वेतिप~~अनुभवपदोपादानेचस्मृतिभिन्नज्ञानत्वरूपानुभवत्वस्यस्मृतावसत्वान्नातिव्याप्ति
रितिभावः॥ननुतथाप्येतादृशापरोक्षत्वजातिमादायैतल्लक्षणस्यशाब्दबोधादावतिप्रसंगः॥नचता
दृशजातौमानाभावः॥अनुमित्यादिस्थलेबाधादिप्रतिबध्यतायांआहार्यप्रत्यक्षव्यभिचारवारणाय
ल२ प्रत्यक्षान्यज्ञानत्वस्यावश्यंनिवेशनीयतयातेषांमिथोविशेषणविशेष्यभावेविनिगमनाविरहेणगौरवात्तदपे
क्ष्यपरोक्षत्वजातेरेवप्रतिबध्यतावच्छेदकत्वौचित्यादित्यतआह॥दृशीति॥अनुभवत्वंविहायपरोक्षत्वं
स्मृतौपरोक्षत्वंविहायानुभवत्वंप्रत्यक्षेअनुमितौचोभयोःसमावेशइतिअनुभवत्वेनसंकोचेनपरो २२
क्षत्वंजातिः॥एवंभिन्नविषयकानुमित्साविरहविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतयासिद्धानु
मित्यन्यज्ञानत्वरूपजातिमादायसंकराविधेयतायाआपत्तिसाधारण्येनबाधप्रतिबध्यतावच्छेदक

श्री

82

वासंभवेपि अनुमित्यादौ विशिष्यानुमितित्वादिकं निवेश्यैव वा घटत्वाद्देः प्रतिबंधकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः॥
अतएव शाब्दबोधे बाधबुद्धेः प्रतिबंधकत्वाकुसतया लाघवयोग्यताज्ञानं शाब्दबोधे हेतुरिति सिद्धांतः॥ अनो
पत्याघस्य प्रत्यक्षान्यत्वं निवेश्यैव वा आहार्यप्रत्यक्षे व्यभिचारो वारणीयः॥ वस्तुतस्तु जन्यत्वसंबंधेन बाधविशिष्ट
ज्ञान४ न्यत्वावच्छिन्नप्रतिबंधकत्वस्य हेतुत्वोपगमेन प्रत्यक्षानुमितिसाधारणैककार्यकारणभावेनैवोपपत्तेः
परोक्षत्वानिवेशस्यानर्थक्यात्॥ इच्छाविशिष्टत्वा बाधिकं न प्रतिरूद्धायाः तुल्यत्वेनेच्छाभन्नाबाधकालेपि शब्द
व्यापत्तेः॥ अन्यथा इच्छाया उत्तेजकत्वे अप्रामाण्यज्ञानाभावादिभिर्विशेषणविशेष्यभावे विनिगमनाविरहरूपसा
दिकं बहुतरमूहनीयं॥ नन्वनुमितित्वजातौ मानाभावेन लक्षणमसंभवि॥ न चानुमिनोमीत्यनुव्यवसायविष
यतया तत्सिद्धिः योग्यात्मविशेषगुणानां विषयाविनिर्मोकेन ज्ञानानभ्युपगमेन केवलमनुमिनोमीत्यनु
व्यवसायस्यासिद्धेः॥ न च पर्वते वह्निमनुमिनोमीत्यनुव्यवसायतया तत्सिद्धिरिति वाच्यं वह्निप्रकारकानु नु१
मितित्वस्य तद्विषयत्वे वह्निमान्पर्वतो घटवानित्यनुमित्यनंतरं तादृशव्यवसायापत्तेः॥ वह्निनिष्ठविधे
यताशालित्वस्य तद्विषयकत्वावश्यकत्वेनानुमितित्वस्यानिवेशात् तद्विषयतया तत्सिद्ध्यसंभवात्॥ न च पर्व त५
तोद्देश्यकवह्निविधेयकानुमितित्वस्य धूमपरामर्शजन्यतावच्छेदकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरि
ति वाच्यं॥ साधनादिभेदेन व्याप्तिभिन्नतया आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्याद्व्यव
हितोत्तरक्षणोत्पत्तिकत्वसंबंधेन धूमपरामर्शविशिष्टज्ञानस्यैव तत्कार्यतावच्छेदकत्वावश्यकत्वेन
अनुमितित्वमनिवेश्य धूमपरामर्शजन्यतावच्छेदके[illegible]पगमात्॥ तत्कोटिप्रविष्टतया तत्सिद्ध्यसंभवात्॥

+ स्वसामानाधिकरण्योभयर × कोटौ ज्ञानत्वस्यैव

मा१

एवं सिद्ध्यभावविशिष्टस्यैव सिद्ध्यभावकार्यतावच्छेदकत्वयातकार्यतावच्छेदकतयापि न तत्सिद्धिरिति ॥ मैवं ॥ वह्निनि
ष्ठविधेयताशालिज्ञानत्वस्य वह्निमनुमिनोमीत्यनुव्यवसायविषयत्वे पर्वतो वह्निमान्स्यादित्यापत्त्यनंतरम् क३
पि तादृशानुव्यवसायापत्तेः ॥ तथाहि ॥ वह्निंपादयामीत्यनुव्यवसायस्य च वह्निप्रकारकापत्तिविषयत्वे वह्नि
मान्पर्वतो घटवान्स्यादित्यापत्त्यनंतरमपि तादृशानुव्यवसायापत्त्या वह्न्यापाद्यकापत्तित्वमेव तद्विष
यो वाच्यः ॥ तत्र चापाद्यस्यैवत्वस्यापाद्यत्वेदनं किन्नस्या।तिरिक्तस्य कल्पने गौरवात् ॥ अनुमित्स्यादित्यसाधा
रणविधेयत्वमेवापाद्यत्वं तथा चानुमित्स्यनंतरमापादयामीत्यनुव्यवसायापत्त्या आपादितत्वस्यैवापत्त्यनं
म तरंप्यनुमिनोमीत्यनुव्यवसायापत्तेरनुमितित्वस्यापि सिद्धेः ॥ एवं पर्वतो वह्निरित्यादिशाब्दबोधा[illegible] नंतरम
पि तादृशानुव्यवसायापत्तिः ॥ शाब्दबोधे आद्यनिर्दिष्टस्यैवोद्देश्यत्वेन चरमनिर्दिष्टस्य च विधेयत्वेन त
त्र वह्नौ विधेयतायाः आवश्यकत्वात् ॥ अन्यथा वह्निपर्वतत्वनिष्ठयोरुद्देश्यविधेयभावानस्वीकारे
पर्वते वह्निः वह्निः पर्वत इति शाब्दबोधयोरुद्देश्यविधेयभावावैलक्षण्येनावैलक्षण्यप्रसंगात् ॥
अथ विधेयतायामनुमितित्वे च मानाभावः ॥ वह्निप्रकारकज्ञानत्वस्यैव वह्निमनुमिनोमीत्यनुव्यवसा
यविषयत्वात् ॥ वि[illegible]तया तादृशानुव्यवसायं प्रति च तत्तदनुमितिसामग्रीविशिष्टज्ञानत्वेन तादात्म्य
प्रत्यासत्त्या हेतुत्वं कार्यतावच्छेदकं च वह्निप्रकारकत्वसामग्रीविशिष्टज्ञानविषयकमानसत्वमेव ॥ तत्तद
नुमितिसामग्र्याश्च बाधाभावसिद्ध्यभावतत्परामर्शादिरूपा सामग्र्या वैशिष्ट्यं च स्वाव्यवहितोत्तर
क्षणोत्पत्तिकत्वसंबंधेन [illegible] नचैतदपेक्ष्य वह्निनिष्ठविधेयताशाल्यनुमितित्वेन हेतुत्वे लाघवाद्विधेयता

तर्क॰प्र॰४२।

अन्नं॰
[illegible] ४२

याः अनुमितित्वस्य च सिद्धिरिति वाच्यं॥ लाघवमात्रेणातिरिक्तविषयतासिद्धौ अव्यवहितोत्तरत्वादेर्विनिवेशगौर
वेण धूमपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनापि अतिरिक्तविषयतासिद्धिप्रसंगात्॥ एवमनुमितिप्रति
बिलक्षणविषयताशालिज्ञानत्वेनैव हेतुतोपपत्तौ व्याप्त्यादिविषयतानिवेशोऽप्रयोजनाभावाच्चेति चेन्न ला
घवमात्रेणातिरिक्तविषयतासिद्धेरसंभवात्॥ विधेयतायां मानाभावेन सामग्रीविशिष्टज्ञानत्वेनैव हेतुत्व
स्यावश्यकत्वे विधेयतायामिवानुमितित्वेपि मानाभाव इति चेन्न॥ लाघवेनातिरिक्तविषयतायाः अन
भ्युपगमेपि आपत्त्यनंतरं तादृशानुव्यवसायवारणाय बाधाद्यभावस्यावच्छेदककोटौ निवेशगौरवात्॥
तद्घटितानुमितिसामग्रीविशिष्टवह्निप्रकारकानुमितित्वेनैवाऽपत्त्यनंतरं तादृशानुव्यवसायवारणे ला
घवेनानुमितित्वजातेरावश्यकत्वात्॥ वस्तुतस्तु॥ सामग्रीजन्यत्वानुपस्थितिदशायामपि वह्निनानुमिनो
मीत्यनुव्यवसायोदयात् सामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विषयताभावेन वह्निनिष्ठविधेयता
शाल्यनुमितित्वावच्छिन्नाभावस्य तद्विषयतावश्यकत्वात्॥ विधेयता अनुमितित्वजातेश्च सिद्धिः॥ याः॰
न च स्वव्याप्यवत्तापरामर्शादिघटितसामग्रीविशिष्टज्ञानत्वसंबंधावच्छिन्नसाध्यनिष्ठप्रति
योगितावच्छेदकताकज्ञानाभाव एव तद्विषय इति वाच्यं॥ तस्य संबंधत्वे मानाभावात्॥ स्वत्वनिय
मकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वाच्चेति कृतं पल्लवितेन॥ ननु ज्ञायमानलिंगस्यानुमिति
करणत्वे तु अतीतानागतहेतुकानुमितेरपलापः॥ तस्यानुमितेः पूर्वमसत्वात्॥ अन्यस्य च व्याप्यत्वे
नाज्ञानात्॥ व्याप्तेरैक्याभावेन यत्र विशेष्ये विशेषणमिति न्यायेन परामर्शस्तत्र परामर्शात्पूर्वं
व्याप्तिज्ञानस्यासत्त्वेन च व्याप्तिज्ञानत्वेनापि करणत्वासत्त्वापत्तेरिति॥ नन्विति॥ लघुपदार्थेति॥

५+ अत्र च संसर्गतया सामग्रीजन्यत्वनिवेशात् तदनुपस्थितिदशायां नानुमिनोमीत्याकारकानुव्यवसायानुपपत्तिः॥ ५

८५

हेतुसाध्याभावज्ञानादिकमित्यर्थः॥ नचाभावज्ञानत्वेन ज्ञानत्वेन वानुमितिहेतुत्वे परामर्शादिजन्यकालेप्यनुमित्यापत्ति
त्तिरिति वाच्यं॥ विशेषसामग्र्यासहकृताया एव सामान्यसामग्र्याः फलोपधायकत्वेन परामर्शाद्यभावेनापत्त्यसंभवा
दिति वक्ष्यते॥ अत्र यद्यपि व्याप्तिघटकेत्येव वक्तुमुचितं तथापि व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शघटका
तत्प्रकरणात्तल्लक्षणाय तथोक्तेः॥ ननु व्याप्तेर्निर्वक्तुमशक्यतया कथं तद्घटकपदार्थज्ञानं करणमित्याशयेन पृच्छति॥
ननु केयमिति॥ साध्यात्यन्ताभाववदिति॥ वह्निमान् धूमादित्यादौ वह्न्यभाववति जलह्रदादौ धूमस्याविद्यमान
त्वाल्लक्षणसमन्वयः॥ धूमवान् वह्नेरित्यत्र धूमाभाववति अयोगोलके वह्नेर्विद्यमानत्वान्नातिव्याप्तिः॥ पर्वतीये
ति॥ पर्वतीयवह्नेरलक्ष्यत्वात् किं तेनात्यन्ताभाववतीत्यर्थः॥ एवं लक्षणाव्याप्तिर्विशिष्टवह्न्यभाववद्वृत्तिघटे स्माभावसम
वायसंबंधावच्छिन्नवह्न्यभाववादिनां वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकत्वेन साध्याभावविशेषणेन वारणं संभवतीति तत्परित्यागः॥ ननु साध्यतावच्छेदकसंबंधावच्छिन्नसा संबंधा)
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितहेतुतावच्छेदकावच्छिन्नवृत्तित्वसामान्याभाव
वत्त्वं व्याप्तिः॥ समवायसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसंबंधा
वच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नत्वनिवेशः॥ अत एव पर्वतीयवह्न्यभावस्यापि निरासः॥ न च पर्वतीयवह्नित्वे
पर्वतीयवह्निविशिष्टवह्नित्वं तथा च विशिष्टस्यानतिरेकाद्वह्नित्वावच्छिन्नप्रतियोगिकत्वमस्त्येवेति वाच्यं॥ सा ता४
ध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यतावच्छेदकपर्याप्तावच्छेदकत्वार्थकत्वेन पर्वतीयत्ववह्नित्वयो[illegible] पर्याप्ता
वच्छेदकतया शुद्धवह्नित्वे पर्याप्ततासत्त्वेनानुपपत्त्यभावात्॥ यदि च उभयोः प्रत्येकानतिरिक्ततया पर्वतीयत्व
वह्नित्वोभयपर्याप्तावच्छेदकतायामपि शुद्धवह्नित्वपर्याप्तत्वादुक्तदोषस्तदवस्थ एवेति चेत्साध्यतेनदा साध्यता
अ॰

वच्छेदकभिन्ननिष्ठावच्छेदक[illegible]रूपिकत्वेसति किंचिदवच्छेदकत्वानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रति
योगिताकत्वमिति निष्कर्षो बोध्यः ॥ सत्यंतनिवेशात्पर्वतीयत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताकाभावमादायविशेष्यदल शे २
निवेशात्पर्वतीयत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकाभावमादायपर्यायेण[illegible]प्रसंगः ॥ वह्न्यभाववति धूमावयवेस
मवायेन धूमस्य सत्वाद्धेतुतावच्छेदकसंबंधनिवेशः ॥ धूमाभाववज्जलह्रदवृत्तित्वाभावस्य वह्नौ सत्वाद्धूमवान्वह्नेरित्या
दावतिव्याप्तिवारणाय सामान्याभावेति । इत्थं चायोगोलकवृत्तित्वस्यापि सामान्यांतर्गततया तदभावस्य हेतौ सत्वान्ना
तिव्याप्तिः ॥ न च तथाप्ययोगोलकवृत्तित्वघटोभयाभावस्य सत्वादतिप्रसंगतादवस्थ्यमिति वाच्यं ॥ तादृशवृत्तित्वावच्छि
वे न्नाभावस्य सत्वात्साध्याभावे च अभावीयदैशिकविशेषणता विशेष[illegible]णैव [illegible]वाच्यं ॥ एवं च घटत्वाभाववान्पटत्वादित्यादौ घ दो १
टत्वाभावाभावस्य साध्याभावस्य घटत्वरूपस्य समवायेनैव सत्वादभावीयदैशिकविशेषणतया तदधिकरणाप्रसिद्धेः ॥
अत्र केचित् ॥ न तत्र घटो नास्तीति प्रतीताविव घटाभावो नास्तीति प्रतीतावपि अभावीयदैशिकविशेषणताविषयत्वम-
नुभूयते इति भावाभावसाधारणीं विशेषणतामंगीकृत्याप्रसिद्धिं परिहरंति ॥ तदसत् ॥ तथा सत्यपि कालिकसंबंधाव[illegible] त्वा ७
ता न्नप्रतियोगिकस्याकाशाभावाभावस्य साध्यतायामाकाशादिहेतावव्याप्तेः ॥ आकाशाभावरूपसाध्याभावस्याभावीयविशेष
णतयाऽप्रसिद्धिनिरस्तेः ॥ एवं भावाभावसाधारणता[illegible] विशेषणतास्वीकारे अभावीयविशेषणतया भूतले वृत्ति घटइतिप्रतीत्या ल ५
पत्तेश्चेति चेन्नैवं ॥ साध्यवत्तागर्भविरोधिता नियामकसंबंधेन साध्याभावत्वस्य विवक्षितत्वात् ॥ घटत्वाभाववान्पटत्वा
व ४ दित्यादौ समवाय एव घटत्वाभावे[illegible]तायां विरोधिता नियामकत्वस्य प्रसिद्धेरसंभवात् ॥ ननु तथापि जातिमान्सत्वादित्या
दौ जात्यभाववत्सामान्यादिनिरूपितहेतुतावच्छेदकसंबंधेन समवायेन वृत्तित्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न ॥ स्वाधिक व्या ३
रणावृत्तिसाध्याभावकत्वमित्यस्य तदर्थत्वात् ॥ अथैवं धूमाधिकरणे कालिकसंबंधेन ध्वंसे भावसत्वादव्याप्तिः ॥ अ
भावीयविशेषणतयाऽवृत्तित्वनिवेशे च घटत्वाभाववान्प्रमेयत्वादित्यत्रातिव्याप्तिः ॥ घटत्वाभावाभावस्य घटत्व

६७

स्यविशेषणतयाऽवृत्तेः ॥ न यावत्साध्यवत्ताग्रहविरोधितानियामकसंबंधेनावच्छिन्नत्वस्यावश्यं निवेशनीयतया सत्ता
भाववान् जात्यभावादित्यत्राव्याप्तिः ॥ जात्यभावाधिकरणसामान्यादिनिरूपितसाध्यवत्ताग्रहविरोधिता
नियामकस्समवायसंबंधावच्छिन्नवृत्तित्वाऽप्रसिद्धेरिति चेन्न ॥ स्वाधिकरणावृत्तिसाध्याभावाधिकरणताक
त्वस्य विवक्षितत्वात् ॥ साध्याभावाधिकरणता च साध्यवत्ताग्रहविरोधितानियामकसंबंधावच्छिन्ना बोध्या ॥
ऽवृत्तित्वं च स्वरूपसंबंधेनैव ग्राह्यं ॥ इत्थं च जात्यभावाधिकरणसामान्यादिनिरूपितस्वरूपसंबंधावच्छि
न्नवृत्तित्वस्य अप्रमेयत्वादौ प्रसिद्ध्या तदभावस्य च सत्ताधिकरणवृत्तित्वेनानुपपत्त्यभावादिति ॥ अव्याप्यवृ
त्तिसाध्यकाव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यमत्र निवेशनीयं ॥ किंतु ॥ हेतुतावच्छेदकसंबंधाव
च्छिन्नवृत्तित्वस्य स्वरूपसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वसामान्याभावो व्याप्तिः ॥
तेन सत्तावान् जातेरित्यादावप्रसिद्धिवारणाय हेतुतावच्छेदकसंबंधसामान्ये साध्याभाववदनुयोगिकत्वस्व स्वंहेतुः=९
प्रतियोगिकत्व एतदुभयाभावविशिष्टत्वं व्याप्तिरित्याहुः ॥ इति न काप्यनुपपत्तिरिति चेन्न ॥ अत्रोच्यते ॥ तथा
पि केवलान्वयिनि साध्याभावाप्रसिद्ध्या व्याप्तिलक्षणमव्याप्तमेव ॥ नन्वव्याप्तिर्नामानुमितिकारणत्वेनाभि
मतस्य व्याप्तिज्ञानस्य व्यतिरेकव्यभिचार एव सबानास्तं नवीति ॥ वस्तुगत्या वाच्यत्वाभावाप्रसिद्धावपि प्रति
योगितया वाच्यत्वापोऽवैं भावद्व्याकारकभ्रमात्मकज्ञानमादायानुमितेरुपपन्नत्वात् ॥ तथाहि ॥ साध्यनिष्ठ
विषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतासांबंनिरूपिता
भावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षनिष्ठविषयताशालिज्ञानत्वे

सत्तावान् जातेरित्यादौ न कोऽपि दोष इत्याहुः ॥ अपरे तु साध्याभाववदवृत्तित्वमित्यत्र

ति२

नैव चानुमितिहेतुत्वं तत्र प्रमादायोपपद्यत एव॥ अथाभावो न वाच्यत्वीयस्सेगदशाविशेषदर्शनकाले तदनुपपत्तिरेव॥
न च तदानैव्यत एवानुमितिरिति वाच्यं॥ तस्यास्तदाप्यनुभूयमानत्वादिति चेत्तथापि निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्धि ६२
प्रतिबध्यतयाऽभावो न वाच्यत्वीय इति ज्ञानकालेपि प्रतियोगितया वाच्यत्वीयेदंनिर्धर्मितावच्छेदकज्ञानस्य च बा
धकाभावेनानुमितेरुत्पत्तेः॥ अभावत्वमनिवेश्य साध्याभावमनुवदवृत्तित्वज्ञानस्यैवानुमितिहेतुत्वादिति
चेन्नैवं॥ अवृत्तित्वज्ञानस्य निर्धर्मितावच्छेदकज्ञानं प्रत्यपि प्रतिबंधकतया प्रतियोगितया वाच्यत्वमिव निर
क्तज्ञानकाले वाच्यत्वीयवदवृत्तित्वज्ञानस्याप्युत्पत्तिसंशयेनानुमित्यपलापस्य दुर्धरत्वादिति निपुणतरमालोच
नीयं सूक्ष्मदर्शिभिरिति॥ ननु नीलघटे यत्किंचिद्घटप्रतियोगिकभेदसत्त्वेन नीलघटो घटान्य इत्यादिवा
पि८ क्यस्यापि प्रामाण्यापत्तिरिति॥ अन्यतावच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभावबोधं प्रत्येव किंचित्प
दसमभिव्याहृतान्यादिपदज्ञानत्वेन हेतुत्वमुपेयं। एवं च प्रकृते साध्यवत्पदसमभिव्याहृतान्यादिपदस्य
साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावबोधकत्वमेव। तथा च साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्यो
न्याभाववदवृत्तित्वमेव लक्षणं लभ्यते तेन अत्र च नोक्तदोष इत्याशयेनाशंकते॥ अथेति॥ साध्यवत्त्वेति॥ सा
ध्यतावच्छेदकावच्छिन्नवत्त्वेत्यर्थः॥ अन्यथा साध्यवत्त्वस्य साध्यस्वरूपत्वेन पर्वतीयवह्निमदन्योन्याभा
वावारणात्॥ साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतानिरूपकप्रतियोगिताका
न्योन्याभाववदवृत्तित्वमिति निष्कर्षः॥ साध्यतानवच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावविवक्षणे
नेपर्वतिलक्षणेपि चालनीन्यायेनाव्याप्तिनिरासस्संभवेपि अत्यंताभावस्याव्याप्यवृत्तितया संयोगद्रव्य

सादित्यादावाभासितः ॥ इत्थं चान्योन्याभावस्य व्याप्यवृत्तितया संयोगवदन्योन्याभावस्य द्रव्ये सत्त्वेनैव नाव्याप्तिरि
ति ॥ पूर्वोक्तप्रतियोगिवैयधिकरण्यादिकं न विशेषणमिति न तत्र तथा विवक्षितमिति ध्येयं ॥ अव्याप्तिं निरस्यति ॥ ना
चेति न हीत्यर्थः ॥ केवलान्वयीति ॥ इदं प्रमेयं वाच्यत्वादित्यादावित्यर्थः ॥ अत्यन्ताभावाप्रतियोगित्वं केवलान्व
यित्वं ॥ प्रमेयत्वस्य च सार्वत्रिकत्वेन तदन्याऽप्रसिद्धोऽव्याप्तिरिति भावः ॥ लाघवात् साध्यवदन्यावृत्तित्वरूपव्याप्ति
ज्ञानमेवानुमितिहेतुः केवलान्वयिनि तादृशज्ञानासंभवेनानुमितिरिव नेष्यते ॥ एवं च का व्याप्तिरिति मी
मांसकमतमनुपदर्शयति ॥ अत्र मीमांसका इति ॥ इह मेयत्वमिति ॥ साध्यवदन्यावृत्तित्वज्ञाना[illegible]स्यावे
नानुमित्यसंभवादनुमिनोमीत्याकारकतद्बुद्धेः किं कस्यचिदनुदयोपपत्तिरित्यर्थः ॥ न चान्योन्याभावेऽप्रमेयत्व
वत्प्रतियोगिकत्वभ्रमदशायामेव तादृशानुभवोपपत्तिरिति वाच्यं ॥ तथापि प्रमेयत्वकैस्य केवलान्वयित्व
ज्ञानदशायां तादृशज्ञानोत्पत्त्यनुपपत्तितादवस्थ्यात् ॥ कारणबाधादिति ॥ विशेषदर्शनदशायां साध्यवदन्यो
न्याभाववद्वृत्तित्वज्ञानस्यानुमितिकारणत्वेनाभिमतस्य बाधात् ॥ असंभवात् ॥ जातिरिति ॥ इयं मेयत्वम
नुमिनोमीति ॥ मेयत्वविधेयकानुमितिरेव तादृशानुव्यवसायविषयः ॥ कारणबाधेन च प्रमेयत्वविधेयका
नुमितेरनुत्पत्त्या विषयबाधेन तादृशप्रत्ययस्य भ्रमत्वमित्यर्थः ॥ व्यभिचारेण व्यतिरेकव्यभिचारेण न
नु इदं साध्यवदन्यावृत्तित्वस्वरूपव्याप्तिबुद्धेः ॥ कारणत्वासिद्धेरिति ॥ सिद्धे तस्य कारणत्वेन तदभावेन त
३ थानुमित्युत्पत्तेस्तादृशानुमितावेव व्यभिचारेण तस्यैव कारणत्वमसिद्धं ॥ न च परेण तादृशानुमितिरेव ने
ष्यत इति वाच्यं ॥ तत्रानुभवस्य प्रमाणत्वे दर्शितत्वात् ॥ यथाकथंचित्संकेतितः प्रमाणत्वस्य शक्योपपादनत्वेन प्रतीतेः
न

वदन्यत्र।१

धूमत्वकल्पनायाऽन्याय्यत्वाच्च॥ अन्यथा क्वापि विषयव्यवस्था न स्यादिति भावः॥ साध्ये [illegible] प्रमेयत्ववदन्यत्॥
अलीकमित्यनेन प्रमेयत्वभ्रान्त्यत्वसूचनं॥ नन्वलीकस्य ज्ञानविषयत्वे मानाभाव इत्यत आह॥ असदिति॥
शशशृंगमिति प्रतीतिविषयस्य शा[illegible]त्वादिति भावः॥ शीयशृंगस्यापारमार्थिकत्वेनालीकत्वमिति भावः॥ अ मेवो
सव्या४ सोऽह[illegible]तेरिति॥ ज्ञानविषयत्वस्य कालसंबंधित्वव्याप्यत्वादिति भावः॥ तेन नासिध्यसिद्धिव्याघातः॥ असतोपि
ज्ञाने कालासंबंध्यलीक एव ज्ञानविषयत्वसत्वेन न तस्य व्याप्यत्वं संभवतीत्यर्थः तस्याभिनिरासः॥ शशशृंग
मित्यादिप्रतीतेश्च शृंगस्य शशीयत्वेनासानोपगमेनान्यथाख्यात्यैवोपपत्तेरिति न तदन्यथानुपपत्त्या तत्सि
द्धिरिति भावः॥ आपात्यसत्ख्यातित्वथापि प्रमेयत्वसाध्यकानुमितावव्याप्तिपरिहारेपि ज्ञेयत्वादिसाध्यके
स्तादुवारिति तुष्यतु दुर्जन इति न्यायेनाह॥ किंचेति॥ कश्चित्तु सिध्यसिद्धिव्याघातादाह॥ किंचेति॥ तदसत्
उक्तव्याघातस्य परिहारात्॥ धूममपीति॥ असत्ख्यातिस्वीकारेपीत्यर्थः॥ अव्याप्तिः साध्यवदन्याप्रसिद्धिनि
बंधनाव्याप्तिः॥ तथाव्याप्तिमेवदर्शयति॥ नहीति॥ तैर्बद्धिरसत्ख्यातिवादिभिः॥ विरोधादिति शेषः॥ नि
५४ स्तावलीकाश्चर मतमाशंकते॥ अन्यैरिति॥ संबंधसामानाधिकरण्यं धूमवान्वह्नेरित्यादौ वह्नौ धूमसामा
नाधिकरण्यमसत्वादित्यादिरतः कोहेम्नेति॥ आयोगोलकीयवह्नौ धूमसामानाधिकरण्याभावेन का
भा२ र्येन संबंधाभावाददोषः॥ अत्रास्वरसमाह॥ नचेति॥ तत्रत्यलक्षणवाक्ये वदंति॥ दूषणं वदंति॥ कार्य्येमा
ध्येसाधनेसाधनवत्तिवृत्तिप्रश्नमुखेन तदेवाह॥ कोपीमिति॥ साध्येकार्य्यदर्शनेनैवसाध्यवत्तिकार्य्ये

निवलक्षणेदूषणसंभवेनपृथक्लक्षणोट्टंकितं॥असिद्धानुमानेधूमवानित्यादौअव्याप्तिमेवविवृणोति॥
नहीति॥अयःपिंडवह्नेरिति॥अत्रनिरूपितत्वंषष्ठ्यर्थः॥अयःपिंडीयवह्निनिरूपितसामानाधिकर
ण्याभावादित्यर्थः॥एकव्यक्तीति॥द्रव्यंपृथिवीत्वादित्यादावित्यर्थः॥अत्रहेतोरैक्येनानेकाश्रयत्वरूपका
र्त्स्न्याप्रसिद्धेरितिभावः॥एकमात्रवृत्तीति॥एतद्रूपवानेतद्रसादित्यादावित्यर्थः॥तत्रहेतुमतःऐक्यान्नहेतु
म ५ मतिउक्तरूपकार्त्स्न्यासंभवादितिभावः॥ननुहेतावेवकार्त्स्न्यंविवक्षितंतथाचप्रकृतेकार्त्स्न्यस्यव्यापकत्व
रूपतयाहेतुतावच्छेदकव्यापकसाध्यसामानाधिकरण्यवत्त्वमितिविनिष्कर्षइतिचेन्न॥द्रव्यंसत्वादित्या
दौसत्तायाएकव्यक्तिकत्वेनसत्तात्वव्यापकद्रव्यत्वसामानाधिकरण्यसत्वादितिव्याप्तिः॥तथापिहेतुम
तिकार्त्स्न्यंविवक्षितं॥तथाचहेतुव्यापकसाध्यसामानाधिकरण्यवत्त्वं॥व्यापकत्वंचावच्छेदकतया॥य
त्रयत्रधूमस्तत्रतत्रावच्छेदकतयावह्निसामानाधिकरण्यसत्वात्वह्निमान्धूमादित्यादौलक्षणस
मन्वयः॥पर्वतेधूमेवह्निसामानाधिकरण्यमितिप्रतीतेः॥अथयाहेत्वधिकरणताव्यापकसाध्याधिकर
णताकत्ववत्वमितिचेन्न॥साध्याधिकरणवृत्तित्वरूपसाध्यसामानाधिकरण्यस्यतत्तदाधेयभे
देनभिन्नत्वमावह्निनिष्ठाभावप्रतियोगित्वरूपव्यापकत्वस्यासंभवात्॥प्रथमस्यदुष्टत्वात्॥द्वि
तीयस्यैवतदपेक्षयाहेतुव्यापकंयत्साध्यंतत्सामानाधिकरण्यस्यैवलघुत्वात्तस्यापिचव्यैवक्ष्यमाणव्या
प्त्यपेक्षयागुरुत्वेनहेयत्वादितिनकिंचिदेतत्॥ननुसाध्यसमाधिकरणस्वसमानाधिकरणयावत्त्वंव्याप्ति
रित्यनेनयावन्तःसाध्यसमानाधिकरणास्तेसर्वेहेतुसमाधिकरणाइत्यर्थलाभःस्यात्॥तेनत्वाचार्यगौर

४ +द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेनाव्याप्तिरतो यद्विशिष्टेत्युक्तं+४

शि १ लक्षणमाह॥ यादृशेति॥ यादृशविशिष्टसमाधिकरणाः यावन्तः साध्यसमानाधिकरणास्तद्वत्त्वं वेति पाठः॥ यत्संदेहे हेतुतावच्छेदकपरं॥ केचित्तु॥ विशिष्टस्यानतिरिक्तत्वेऽप्युक्ताव्याप्तिरतिव्याप्तिश्चेत्यत आह॥ यादृशविशिष्टेति॥ न यच्च पूर्वोक्तलक्षण एव हेतुतावच्छेदकसाध्यतावच्छेदकयोर्निवेश इत्याहुः॥ तदसत्॥ तद्वत्त्वं वेत्यनेन लक्षणान्तरकथनं तस्यासंगतत्वापत्तेः॥ तस्मान्मदुक्तरीतिरेवात्रानुसर्तव्या॥ नन्वेवमपि गुणकर्मान्यत्वे विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्त्या साध्यतावच्छेदकस्यापि निवेश आवश्यक इति वाच्यं॥ विशिष्टसत्तायां विशिष्टसत्तानिरूपिताधारतासंबंधेन साध्यतायां जातिसमाधिकरणगुणत्वादीनां विशिष्टसत्तानिरूपिताधारतासंबंधेन विशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभावेनातिव्याप्तेरभावात्॥ समवायेन तस्याः साध्यत्वे तु सद्धेतुत्वादेवोक्तदोषाभावादित्यभिप्रायात्॥ यदि च समवायेनैव तस्याः साध्यतायां गुणे गुणकर्मान्यत्वविशिष्टसत्ता नास्तीति धीबलात् गुणकर्मान्यत्वविशिष्टसत्ताभावस्य गुणे सत्त्वेन विशिष्टसत्तात्वावच्छिन्नात्तावच्छिन्नतया व्यभिचारित्वं॥ न च सत्ताभाववान् प्रतियोगिव्यधिकरण इति वाच्यं॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभावावच्छिन्नत्वस्यैव व्यभिचारतया तस्य तत्रापि सत्त्वात्॥ अन्यथा तत्तत्त्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादव्यभिचारित्वानुपपत्तेः॥ लाघवेन निरवच्छिन्नसाध्याभाववच्छिन्नत्वस्यैव व्यभिचारित्वाच्चेति समवायेन विशिष्टसत्तायामप्यतिव्याप्तिरिति विभाव्यते तदा साध्यतावच्छेदकमपि निवेश्यं॥ अत एव यादृशविशिष्टसमानाधि-

साध्यताया ३ करणाः यावन्तः साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणास्तद्वत्त्वं वेति॥ तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्ताया अनतिरेकेऽपि नाव्याप्तिः॥ न च गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरि

९३

१+ तत्रचानतिरिक्तत्वेपीत्यपिनाविशिष्टस्यातिरिक्तमंगीकृत्यपूर्वलक्षणंसूचितं।१

त्यादौऽतिव्याप्तिरितिपुस्तकेषुउत्तोलितःपाठोऽपिदृश्यतेतैस्तन्नक्वाप्यनुपपत्तिः।इदमेवलक्षणंसंगमयति।।स्ववतीतिचेति।।
लस२ नचेद्दशमिति।।स्वविशिष्टसमानाधिकरणंसर्वधूमाधिकरणंनेत्यर्थः।।वह्नित्वविशिष्टसमानाधिकरणायावदं
तर्गतायांगोलकत्वादेर्धूमासमानाधिकरणत्वादितिभावः।।धूमव्याप्तिः।।धूमनिरूपितव्याप्तिः।।अत्रैवसा नं३
धनतावच्छेदकसंबंधेनसाधनाधिकरणंबोध्यं।।अन्यथासमवायेनधूमाधिकरणवृत्तिधूमावयवत्वादानां
वह्निसामानाधिकरण्याभावादव्याप्तेः।।एवंसाध्याधिकरणत्वमपिसाध्यतावच्छेदकसंबंधेनअन्यथावह्न्यधिकरण क५
वृत्तयोगोलत्वादीनामपिकालिकसंबंधेनधूमाधिकरणायोगोलकवृत्तित्वादतिप्रसंगापत्तेः।।धूमसमानाधिकरणा
नांसंयोगेनवह्न्यधिकरणानांपर्वतादिवृत्तित्वात्समवायेनवह्निसाध्यकेसंयोगेनधूमहेतुकेऽतिव्याप्तेश्च।।ए
वंसाधनाधिकरणवृत्तित्वंघटकसंबंधेनसाध्याधिकरणवृत्तित्वंचवाच्यं।।अन्यथावह्निमानधिकरणायोगोल स८
कत्वादीनामपिधूमाधिकरणमहानसादौकालिकसंबंधेनवृत्तित्वादतिव्याप्तितादवस्थ्यमिति।।नन्व
प६ त्रसाधनाधिकरणवृत्तित्वंयद्धेतुतावच्छेदकसंबंधेनविवक्षितं।तदाइदमेतद्रूपभिन्नंगुणत्वादित्यादौगुण
त्वाधिकरणसमवेतानांयावतामेतद्रूपभिन्नानांसमवेतत्वादतिव्याप्तिः।एतद्रूपमात्रसमवेतस्याप्रसिद्धेः।।नापिसा
ध्यतावच्छेदकसंबंधेनजातिमान्मेयत्वादित्यत्रमेयत्वाधिकरणसमवेतानांयावतांजातिमत्समवेतत्वादतिप्र
संगात्।।नचविषयतयातद्वृत्तित्वंविवक्षणीयं।।वह्निमान्धूमादित्यादौविषयतयाधूमाधिकरणवृत्तीनांधू
मवन्मात्रविषयकज्ञानादीनांवह्न्यधिकरणेऽपिविषयतयावृत्तेर्लक्षणसमन्वयः।।धूमवान्वह्नेरित्यादौअयो
गोलकमात्रविषयकज्ञानादीनांधूमासमानाधिकरणत्वान्नातिव्याप्तिरितिवाच्यं।घटभिन्नोमेय

६+ त्वादीनां वह्निसमानाधिकरणत्वाल्लक्षणसमन्वयः। अयोगोलकस्य प्र[illegible]रिकप्रमाविरः
व्य+६

ना क

त्वादिसत्त्वमेपत्वाधिकरणवृत्तीनां [illegible] घटभिन्नत्वसमानाधिकरणत्वादतिव्याप्तिः। घटमात्रविषयज्ञानस्य चाप्र
सिद्धत्वात्। न च येन केनापि संबंधेन साधनाधिकरणवृत्तित्वं विवक्षितमिति वाच्यं। द्रव्यं सत्त्वादित्यादौ सत्त्वाधिकरणवृ
त्तीनां यावतामेव कालिकसंबंधेन द्रव्यत्वाधिकरणवृत्तित्वादतिव्याप्तिरिति चेन्न। येन येन संबंधेन साधनाधिकर
णवृत्तयो यावंतस्तेन तेन संबंधेन साध्याधिकरणवृत्तयस्तद्वत्त्वस्य विवक्षितत्वात्। यदि चैवमननुगम इति विसाध्य
धू५ तेतद्विशेषणताविशेषेणसा[illegible]नाधिकरणवृत्तयो यावंतः विशेषणताविशेषेणसाध्याधिकरणवृत्तयस्त
रू८ त्त्वमिति बोध्यं। धूमवत्त्वप्रकारक[illegible]प्रमाविशेष्यत्वस्य च धूमसमानाधिकरणत्वान्न व्यभिचारिण्यतिप्रसंगः
खु६ तिनिगर्वः। केवलान्वयिनि लक्षणमुपपादयति। अस्ति चेदिति। इदं निरुक्तव्याप्तिलक्षणं। केवलान्वयिनि।।
केवलान्वयिसाध्यके प्रमेयमभिधेयत्वादित्यादौ। एवं चेति। मतमपास्तं इत्यनेनान्वयः। एवं एतादृशस्य व्याप्ति
त्वे च लाघवादिति। हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्त्यपेक्षया लाघवादित्यर्थः। तत्र प्रतियोगिवै
य्यधिकरण्यादिनिवेशेन गौरवादिति भावः। साध्यवदिति। सा[illegible]ध्यवदन्यावृत्तित्वस्य गगनादावपि सत्त्वेन वह्नि
साध्यके गगनादिहेतुके गगनादावतिव्याप्तिरतः साध्यसमानाधिकरणत्वमिति। न च तत्र व्याप्तिसत्त्वेऽपि पक्ष
धर्मताज्ञानविरहेण वानुमितिवारणे किं तद्वारणाय विशेषणोपादानेनेति वाच्यं। गगनमवह्नीसवृत्तितज्ज्ञानं
स्य गगनं पर्वतवृत्तीति ज्ञाने ग्राह्याभावावगाहितया प्रतिबंधकत्वेन तदनुपपत्तावपि भिन्नविषयकस्य गगन
वान्पर्वत इति ज्ञानस्योत्पत्तौ बाधकाभावेन पक्षधर्मताज्ञानस्यापि संभवेन तद्वारणाय विशेषणोपादानस्याव
श्यकत्वात्। एवं द्रव्यं घटत्वपटत्वान्यत[illegible]दित्यत्र विरुद्धेऽतिव्याप्तिवारणाय तस्यावश्यकत्वं। इदं तु सामा

स्मा

नाधिकरण्यज्ञानस्याप्यन्वयव्यतिरेकाभ्यांकारणत्वाभिप्रायेण।।अन्यथानुवृत्तिमत्त्वनिवेशेनापिगगनादि
वारणासंभवइतिबोध्यं।।नचेदमिति।।साध्यवदन्यावृत्तित्वमित्यर्थः।।नेदमनुमानमिति।।नकेवलान्वयिसा
ध्यकानुमानमित्यर्थः।।व्याप्तिज्ञानाभावात्तादृशानुमितेरसिद्ध्यानतत्करणतयातदनुमानस्वीकारइतिभा
वः।।नतोपीति।।साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपव्याप्तिस्वरूपतोपिअस्यनिरु
क्तव्याप्तिस्वरूपस्यलघुत्वात्।।अभावाप्रवेशेनलघुत्वात्।।नचयावत्स्वव्यापकत्वादन्यस्यदुर्वच
तयाव्यापकत्वस्याभावघटितत्वेनगुरुतयाकुतोस्यलघुत्वमितिवाच्यं।।अपेक्षाबुद्धिविशेषविषयत्वरूप
स्यैवयावत्त्वस्यात्रप्रवेशनीयत्वात्।।वस्तुतस्तुसाध्यवदन्यावृत्तित्वस्यह्यधिकरणावृत्तित्वाभावक
त्वरूपस्यावश्यंविवक्षणीयत्वेनावृत्तित्वस्यचसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनावश्यंवक्तव्यत ण १
याविरोधितानियामकत्वस्यचसमवायाभावीयविशेषतासाधारणस्यानुगतस्याभावाद्गौरवेणनिरुक्तव्या
प्तिस्वरूपस्यैवलघुत्वात्।।निरुक्तव्याप्तिस्वरूपेचविशेषणताविशेषेणैवसामानाधिकरण्यस्यनि
वेशेनव्यापकत्वांशेप्रतियोगिवैयधिकरण्याद्यप्रवेशेनलाघवस्यातिस्फुटत्वादिति।।एवंगुरुधर्मावच्छि
व्य४ न्नसाध्यकस्थलेतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिवारणायसाध्यतावच्छेदकावच्छिन्नवन्निष्ठा
न३ भावप्रतियोगिता।तावच्छेदकधर्मावच्छिन्नाभाववदवृत्तित्वंव्याप्तिरितिवक्तव्यं।।तत्रतादृशप्रतियोगितान
वच्छेदकत्वंतत्रतादृशप्रतियोगितावच्छेदकत्वापेक्षयाकंबुग्रीवादिमत्त्वावच्छिन्नावच्छिन्नप्रतियोगिताभेदनि क २
वेशनेनसंभवतिघटत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षयाकंबुग्रीवादिमत्त्वावच्छिन्नवन्नि

ष्टत्वावप्रतियोगितावच्छेदकत्वस्य गुरुत्वेन तादृशाभावाप्रसिद्धेः॥ किंतु तादृशप्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वे
नोपादाय तच्च व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूट एव निवेश्यः तदितिगौरवात्॥ दुर्ज्ञेयत्वाच्च न तादृशव्या
प्तेर्ज्ञानं हेतुरिति ध्येयं॥ इदमुपलक्षणं॥ ग्रामेयत्वमनुमिनोमीत्यनुव्यवसायबलादेव तल्लोकारस्यावश्यकरीतिभा
चा गेवोक्तेमिति॥ सर्वत्र व्याप्तौ शंकैकत्वसत्वेन व्याप्तिग्रहानुदयात्कारणेतौ ज्ञात्वेनानुमितेरसिद्ध्या न तत्कारणतया
अनुमानप्रामाण्यमिति॥ चार्वाकमतेदृशीयितुं तन्मतमुपन्यस्यति॥ अथ चार्वाका इति॥ किंचिदीति॥ धूमसमा
नाधिकरणत्वसामानाधिकरण्येन वह्निसमानाधिकरण्यासंशये धूमसमानाधिकरणत्वावच्छेदेन व
ह्निसामानाधिकरण्यरूपव्याप्तिग्रहानुदयादित्यर्थः॥ ननु तादृशशंकायामपि व्याप्तिग्रहे किं बाधकमित्यत आ
ह॥ तच्चेति॥ न हीत्यर्थः॥ [illegible] शंकायां धूमसमानाधिकरणत्वसामानाधिकरण्येन वह्निसामानाधिकरण्याभा
वशंकायां तस्यास्तादृशशंकायास्तु प्रतिबंधकत्वात्॥ तादृशव्याप्तिप्रतिबंधकत्वात्॥ नै भूतत्वसामानाधिक च ८७
ण्येन घटत्वाभाववत्ताज्ञानस्यानिर्णयात्मनः भूतत्वावच्छेदेन घटवत्ताज्ञाने बाधनिर्णयविधयाप्रतिबंधक
कथं ५ त्वेपि तादृशशंकायास्तत्र प्रतिबंधकत्वं यथा संशयस्यापि प्रतिबंधकत्वे च पर्वतो वह्निमान्नेति संशयेऽनुमि
त्यादेरनुत्पत्तिरिति वाच्यं॥ यद्धीसामग्रीप्रतिबंधिकाविशेषादर्शने तद्धीरपि तत्रेति न्यायेन वैशिष्ट्यप्रत्यक्षे वि
शेषदर्शनाभाववैशिष्ट्य तदभावप्रकारकज्ञानत्वेन संशयस्यापि प्रतिबंधकत्वांगीकारात्॥ अन्यथा स्थाणु
र्वा पुरुषो वेति संशयोत्तरं [illegible] विशेषदर्शने संशयोत्तरप्रत्यक्षापत्तेः॥ तत्र बाधनिर्णयाभावात्॥ संशयस्य प्र
तवनये प्रतिबंधकत्वादिति॥ यद्वित्याप्रामाण्यज्ञानाभावादिसविशेषणविशेष्यभावविनिगमनाविरहेण व

विनैव र

शेषदर्शनस्योत्तेजकत्वात्संशयान्नविशेषदर्शनाभावविशिष्टतदभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबंधकत्वं विशेष
दर्शनभिन्नकाले संशयोत्तरप्रत्यक्षानुपपत्तेश्च संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वकल्पनेन तदभावात्स्वोप
पत्तेरिति विभाव्यते तदा तादृशसामग्रीप्रतिबंधिका बोध्येति भावः ॥ ननु वह्निधूमयोः सामानाधिकरण्यस्यैव द वं २
र्शनेनैव तादृशशंकाविरोधीत्याशयेनाह ॥ नचेति ॥ तयोर्दर्शनात् ॥ वह्निधूमसाध्यसाधनयोः सहचारदर्शना
त् ॥ निवृत्तिः ॥ व्यभिचारशंकानिवृत्तिः ॥ शतशइति ॥ घटादिरूपा पृथिवी लोहलेख्या पार्थिवत्वादित्यादौ घटा
दिषु पार्थिवत्वलोहलेख्यत्वयोः सामानाधिकरण्यग्रहेपि हीरके व्यभिचारग्रहादित्यर्थः ॥ तथा च व्यभिचारेण
न सत्यादर्शनस्यैतादृशशंकाप्रतिबंधकत्वमिति भावः ॥ ननु धूमवह्न्योः कार्यकारणभावात् धूमो यदि वह्निव्यभिचा म १
रीस्यात्तर्हि वह्निजन्यो न स्यादिति तर्क एव धूमो वह्निव्यभिचारी न वेति शंकानिवर्तकः ॥ पार्थिवत्वलोहलेख्य
त्वयोस्तु कार्यकारणभावाभावात् ॥ यदि लोहलेख्यं न स्यात् तदा पार्थिवत्वं न स्यादिति तर्कासंभवान्न तत्र व्यभि भिबा १
चारशंकाविरह इत्याशंकते ॥ नच तर्कादिति ॥ व्याप्तिग्रहमूलकत्वेनोपाद्यापादकयोर्व्याप्तिग्रहमूलकत्वेन ॥ अ
नवस्थानादिति ॥ तर्कमूलभूतव्याप्त्यावपि ॥ व्यभिचारशंकानिरासार्थं तर्कान्तरापेक्षायामनवस्थेत्यर्थः ॥
तथा च मूलशैथिल्यान्न तर्कस्य तच्छंकानिवर्तकत्वमिति भावः ॥ अत्र विपर्ययेतरकोटिमात्रापर्यवसानं इ
ष्टापत्तिः ॥ मूलशैथिल्यं चेति तर्के त्रयो दोषाः ॥ विपर्ययेतरकोटिमात्रापर्यवसानेपि न एव तदभावशंकानि
वर्तकत्वाच्चादितरकोटिपर्यवसाने च तदसंभवात् विपर्ययेतरकोटिमात्रापर्यवसानस्य दूषकत्वं बोध्यं ॥ इष्टाप
त्तेश्च तर्ककारिणीभूतापाद्यव्यतिरेकनिर्णयविघटकत्वेन मूलशैथिल्यस्य च तत्कारिणीभूतापाद्यापा

६ + धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यर्थः ॥ तन्निवृत्तिः ॥ व्यभिचारशंकानिवृत्तिः ॥ + ६

द्वाभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वेन तादृशाभावाप्रसिद्धेः॥ किंतु तादृशप्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वे
नोपादाय तच्च व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूट एवह्निवेश्यत इति गौरवात्॥ दुर्ज्ञेयत्वाच्च न तादृशव्या
प्तेर्ज्ञानं हेतुरिति ध्येयं॥ इदमुपलक्षणं॥ प्रमेयत्वमनुमिनोमीत्यनुव्यवसायबलादेव तत्प्रकारकत्वमावश्यकमिति प्रा
चा। गेवोक्तमिति॥ सर्वत्र व्याप्तौ शंकासंभवेन व्याप्तिग्रहानुदयात्कारणतौ भावेनानुमितेरसिद्ध्या न तत्कारणतया
अनुमानप्रामाण्यमिति॥ चार्वाकमतं दूषयितुं तन्मतमुपन्यस्यति॥ अत्र चार्वाका इति॥ किंचिदिति॥ धूमसमा
नाधिकरणत्वसामानाधिकरण्येन वह्निसमानाधिकरण्याभावसंशये धूमसमानाधिकरणत्वावच्छेदेन व
ह्निसामानाधिकरण्यरूपव्याप्तिग्रहानुदयादित्यर्थः॥ ननु तादृशशंकायामपि व्याप्तिग्रहे किं बाधकमित्यत आ
हा। नचेति। नहीत्यर्थः॥ [illegible] शंकायां धूमसमानाधिकरणत्वसामानाधिकरण्येन वह्निसामानाधिकरण्याभा
वशंकायां। तस्यास्तादृशशंकायास्तत्प्रतिबंधकत्वात्॥ तादृशव्याप्तिप्रतिबंधकत्वात्॥ नैभत्नैत्वसामानाधिक च ल७
रण्येन घटाभाववत्ताज्ञानस्य निर्णयात्मनः तत्तत्त्वावच्छेदेन घटवत्ताज्ञाने बाधनिर्णयविधया प्रतिबंधक
कथं ५ त्वेऽपि तादृशशंकायास्तादृशप्रतिबंधकत्वं ग्राह्यं संशयस्यापि प्रतिबंधकत्वे च पर्वतो वह्निमान्नेति संशयेऽनुमि
त्यादेरनुत्पत्तिरिति वाच्यं॥ यद्धीसामग्रीप्रतिबंधिका विशेषादर्शने तद्धीरपि तत्रेति न्यायेन विशिष्यप्रत्यक्षे वि
शेषदर्शनाभावविशिष्टतद्वत्ताप्रकारकज्ञानत्वेन संशयस्यापि प्रतिबंधकत्वांगीकारात्॥ अन्यथा स्थाणु
र्वा पुरुषो वेति संशयोत्तरं [illegible] विशेषदर्शने संशयोत्तरप्रत्यक्षापत्तेः॥ तच्च बाधनिर्णयाभावात्॥ संशयस्य प्र
तवनमेऽप्रतिबंधकत्वादिति॥ यद्वा प्रामाण्यज्ञानाभावादौ सविशेषणविशेष्यभावविनिगमनाविरहेण प्र
विनैव२

ना४ अ४

हकव्याप्तिग्रहप्रतिबंधकत्वेन यथायथं दूषकता बोध्या। उपसंहरति। इत्थं चेति। व्यभिचारशंकाप्रतिबंधकस्याभावेन
ये जागरूकव्यभिचारसंशये चेत्यर्थः। ग्राहकाभावात्। व्यभिचारज्ञानाभावरूपग्राहकाभावात्। कुत इति। हेतोरनुमानप्रमाणस्या
दित्यर्थः। अनुमितिकरणतया अनुमानस्य प्रामाण्यं व्याप्तिनिश्चये चानुमितेरसंभवात्तत्करणतया अनुमानप्रामाण्यदूर व
पास्तमिति भावः। व्यभिचारज्ञानविरहादिकमिति। तद्वत्ताज्ञानं प्रति तदभाववत्ताज्ञानाभावस्य हेतुतया व्यभिचाररूपव्याप्ति
ग्रहे साध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानाभावो हेतुरित्यर्थः। आदिना सहचारज्ञानपरिग्रहः। न च साध्याभाववद्वृत्ति
त्वांशे संशयात्मकव्यभिचारसंशयसत्त्वे व्याप्त्यग्रहः संशयनिश्चयसाधारणव्यभिचारज्ञानाभावस्यैव हेतुत्वाच्चस्तायां च पक्षी
पसाध्यसंदेहात्मकव्यभिचारसंशयस्यापि प्रतिबंधकत्वे असत्त्वावनुमानोच्छेदापत्तिरिति वाच्यं। साध्याभाववद्वृत्तित्वांशे निश्चय मात्रे
यात्मकवृत्तित्वांशे संशयनिश्चयसाधारणव्यभिचारज्ञानाभावस्यैव हेतुत्वात्। ननु ज्ञानादौ विभुव्याप्यवृत्तितया शरीरावच्छे ना८
देन व्यभिचारज्ञानसत्त्वेपि घटाद्यवच्छेदेनात्मनि समवायेन तदभावसत्त्वाद्व्याप्तिग्रहापत्तिरिति चेन्न। समवायसंबंधा २१
वच्छिन्नप्रतियोगिताकव्यभिचारज्ञानविशिष्टात्मत्वाभावस्य स्वसमानाधिकरणत्वसंबंधेन व्यभिचारज्ञानाभावस्य वा
हेतुत्वात्। तस्य च व्याप्यवृत्तित्वादिति। न च तथापि धूमवह्न्योः सहचारज्ञानस्य व्याप्तिग्रहहेतुत्वे मानाभावः। न च विनैव स
हचारग्रहं व्याप्त्यग्रहदर्शनादन्वयव्यतिरेकाभ्यां तस्य कारणत्वमिति वाच्यं। ग्राहकसामग्रीक्रमयौगपद्याभ्यामेव सह
चारग्रहव्याप्तिग्रहयोः क्रमयौगपद्ययोरुपपत्तेस्तयोः परस्परहेतुत्वे मानाभाव इति चेन्नैवं। स्वसमानाधिकरणाय यावंतो धर्मा
उ इत्यत्र धर्मे हि सामानाधिकरण्यरूपसहचारज्ञानस्य विशेषणज्ञानत्वेन हेतुतया तस्य वा आदिपदेन संगृहीतत्वात्। ननु सा
ध्यसाधनज्ञानस्यापि। एवं प्रतिबंधकाभावांतरस्यापि आदिपदेन संग्रहीतत्वादिति दिक्। ननु व्यभिचारज्ञानवि
रहः संशयनिश्चयसाधारणाभावः सर्वत्र संशयत्वे च कथं संघटते साशंक्य निराचष्टे। न चेति तर्करधूमो यदि [illegible]

100

अनु०
[illegible]५७

क ना

तर्क॰ग्रं॰५०

व्यभिचारीस्यात्तर्हिवह्निजन्योनस्यादितितर्कात्॥ अनवस्थां निरस्यति॥ क्वचिन्मूलेति॥ तर्कमूलेसर्वथा॥ ता वक्तेः।
व्यभिचारशंकानिवृत्तेः॥ ननुसर्वत्रव्यभिचारशंकोदिस्यात्तावि[illegible]वेत्यसंगतआह॥ अनुत्पत्तवेति॥ तथाचप्र ण
त्वावेनसंशयसामग्र्येवनकल्पतइतिभावः॥ ननुतर्कस्यव्यभिचारशंकानिवर्तकत्वेमानाभावः॥ अत्राह॥ शिं
य५ कायास्तर्ककारणीभूतज्ञानेनैवनिरस्तत्वात् अतआह॥ आपत्तिप्रतिपक्षधर्मतांशेआहार्यरूपापाद्यव्या या
पादकवत्ताज्ञानं आपाद्यव्यतिरेकनिर्णयश्चहेतुः॥ व्याप्तिश्च अन्वयतोव्यतिरेकतश्च॥ तथाचधूमोयदिवं। व्य
भिचारीस्यात्तर्हिवह्निजन्योनस्यादित्यत्रवह्निव्यभिचारित्वंवह्निजन्यत्वाभावव्याप्यमिति अन्वयव्य भिचा
नेवह्निजन्यत्वाभावेचवह्निव्यभिचारित्वव्यापकत्वग्रहात् वह्निव्यभिचारित्वव्यापकवह्निजन्यत्वाभावइ। ज्ञा
नसंपत्त्या आपाद्यव्यतिरेकनिर्णयविधयानदभावज्ञानस्यचसत्त्वात्॥ वह्निव्यभिचारित्वव्यापकाभा। क्ता
ज्ञानसंभवान्नाहार्यव्यभिचारशंकासंभवः॥ एवंवह्निजन्यत्वव्यापकीभूताभावप्रतियोगिवह्निव्य। त्वा
रित्वमिति व्यतिरेकव्याप्तिग्रहेपि वह्निव्यभिचारित्वाभावेवह्निजन्यत्वव्यापकत्वग्रहेतुल्यवित्तिवेद्य। या
वह्निजन्यत्वेपिवह्निव्यभिचारित्वाभावव्याप्यत्वग्रहेवह्निव्यभिचारित्वाभावव्याप्यंवह्निजन्यत्वमिति ज्ञान
नर संभवेतद्वत्ताज्ञानस्यचापाद्यव्यतिरेकनिर्णयविषयासत्त्वेनैतदभाववान्धूमोयमितिज्ञानेविद्यमानेपितद। प
काभाववत्ताज्ञानस्यविशिष्टवैशिष्ट्यावगाहिनएवतद्वत्ताज्ञानप्रतिबंधकतया कथंतस्यविरोधित्वं॥ ए व्यति
रेकिणि आपादकाभावव्याप्यापाद्याभाववान्धूमोयमितिज्ञानेसंभवेपितदभावव्याप्यवत्ताज्ञानस्य पीव
२+ तदभाववत्ताज्ञानव्याप्यवत्ताज्ञानस्यसत्त्वान्नतदाशंकोदयः॥ नत्वान्वयिन्यापादकव्यापकमापाद्यं।+२

KKSU LIBRARY
RAMTEK
441 106
M-1676
Dist Nagpur

101

× वैयर्थ्यमिति चेदुच्यते। अनाहार्यशंकानिवृत्तिसत्वेपि आहार्यशंकानिवर्तकत्वेनैव तर्कस्योपयोग ×१०

धिष्टवैशिष्ट्यावगाहित्वमपेक्षितं तत्प्रतिबंधकत्वात्तदसंसर्ग एवेति वाच्यं॥ धूमव्यापको वह्निः वह्न्यभाववांश्चायमिति ज्ञान
द्वयसाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्यापकत्वग्रहकालीनतद्धर्मावच्छिन्नाभाववत्तानिश्चयत्वेनैव व्यापकाभा
करादि वज्ञानस्य प्रतिबंधकत्वात्॥ एवं पुरुषत्वव्याप्यकरादिमांश्चायमिति ज्ञानद्वयसाधारण्याय तद्धर्मावच्छिन्नविशे
ष्यकव्याप्यत्वग्रहकालीनतद्धर्मावच्छिन्नवत्त्वनिश्चयत्वेनैव तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वात्॥ उक्तज्ञा
नद्वयसत्वेन संशयानुदयात्॥ यत्किंचिद्व्यतिरेके आपादकाभावे आपाद्याभावव्यापकत्वग्रहेपि आपाद्याभावा आ
न६प९ पादकाभावव्याप्यत्वज्ञानस्य नैष्फल्यं तुल्यवित्तिवेद्यत्वे मानाभावात्॥ एवं व्यापकाभाववज्ञानस्य तदभावव्याप्यव
त्ताज्ञानस्य च विशिष्टवैशिष्ट्यावगाहित्व एव प्रतिबंधकत्वं उक्तज्ञानद्वयस्य प्रतिबंधकत्वेपि तदु[illegible]न
स्यत्र सौविशिष्टज्ञानादेर्प्रतिबंध इति सक्ते आपादकसंशयोत्पत्तौ बाधकाभावादिति विभाव्यते तथापि आपाद्याभा
अनुमिति ववत्तानिश्चयस्यापादकज्ञाने व्यावर्तकधर्मदर्शनविधया प्रतिबंधकत्वमव्याहतमिति अनाहार्यव्यभिचारि
त्वसंशयस्याभावात् आहार्यशंकायास्तु विरोधित्वान्न तर्कस्योपयोगः॥ [illegible]स्याप्रतिबंधकत्वेतु तर्हा मव्याः प्रति न
बंधकत्वमेव॥ न च तथापि तर्कस्याहार्यज्ञानरूपस्य क[illegible]थमाहार्यशंकाप्रतिबंधकत्वं आहार्यज्ञानस्या
प्रतिबंधकत्वादप्रतिबध्यत्वाच्चेति वाच्यं॥ अनिष्टप्रसंजनात्मकतर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसा
धनत्वज्ञानजननेनापादकज्ञाने दोषोत्पत्त्या तत्रेच्छानुसरणाविच्छारूपकारणाभावेनाहार्यशंकानुदयात् तर्केणैव तन्नि ३
वर्तकस्यापि वशसंपन्नत्वात्॥ अत एवापादकांशे संशयात्मकज्ञानमपि तर्के हेतुः॥ अन्यथा तन्निर्णयस्यैव हेतु
त्वेकारणीभूते आपादकनिर्णय एव तर्कानात्मकद्विष्टसाधनताज्ञानसत्वेपि न संशये इष्टसाधनताज्ञाना

तर्क.प्र.५७

गत्यक्षेप

अनाहार्य१

त्वावेनतत्रेच्छोत्पत्तौबाधकात्वावेनाहार्यशंकानिवर्त्तकत्वासंभवात्॥केचित्तु॥तदापादकोपाधिना[illegible]हार्यसाधारण
तद्विशिष्टबुद्धित्वेनप्रतिबध्यप्रतिबंधकभावः॥समानविषयकत्वाभावे[illegible]पिफलबलात्कल्पनीयइतितर्कोपयो
गित्वमाहुः॥अन्येतु॥व्यभिचारशंकायामुत्तेजकतयातर्कोपयोगइत्याहुः॥यद्यपिबाधकालीनमिच्छाजन्यंज्ञा
नमाहार्यंतथापिगुरुतरेच्छाजन्यत्वमात्रंआपादकांशेआहार्यत्वंबोध्यं॥तर्कश्चद्विविधः॥व्याप्तिग्रहोविषयपरि
शोधकश्च॥आद्यस्तूक्तएव॥द्वितीयस्तुपर्वतोयदिनिर्वह्निःस्यात्॥तर्हिनिर्धूमस्यादित्याकारकः॥विषयस्या
नुमितिविषयस्यसाध्यस्यपरिसंशुद्धिः॥विरोधिशंकाविघटनं॥ननुसाध्यव्याप्यवत्तापरामर्शेसाध्यसंदेहस्या
नवतारात्कुतस्तस्यविरोधित्वं॥आद्यसंशयस्याप्रतिबंधकत्वाच्चतर्केणापिकथंतन्निरासइतिचेन्नैवं॥स्वर
सवाहिनःसंशयस्यविशेषदर्शनप्रतिबध्यत्वेपिअन्याहितस्यतस्याप्रतिबध्यत्वाप्रतिबंधकत्वाच्च॥तथाचयद्य पा८
धूमाद्वीऽमत्तानेनभवितव्यंतथापिकुतश्चिद्धूमसावसाधनाद्धूमत्तावत्त्वेऽपिसवितव्यमितिशंकातद
र्थोंकेवह्निविरहसाधकमितिजिज्ञासाचजायतेविरोधिप्रमाणजिज्ञासयाबाधकप्रमाणशंका।तयासाध्या
त्वावशंकाजन्यतेसाचसत्यपिपरामर्शेऽन्याहितत्वादुत्पद्यते।अत्राप्रामाण्यशंका।हितेवापशंका[illegible]सत्यपि
अर्थंनिश्चये।निर्वह्निःस्यादितितर्केणचानिष्टप्रसंजनात्मनाविरोधिप्रमाणजिज्ञासानुत्पत्तौ।बाधकप्रमा
पाशंकानिवृत्तौतदाहितसाध्यशंकायाअपिनिवृत्तिः॥अन्यधियाप्यास्तुसाध्यशंकायाःसतिपरामर्शेसंभवा
दप्रतिबंधकत्वाच्चेतिसर्वमवदात॥इत्यनेनेति।महानसीयधूमसवन्होःसन्निकर्षेणतत्रैवव्याप्तिग्रहानुपपत्ती

क

103

यथा कोऽपि पर्वतीयवह्नेरसन्निकर्षेणतदंशरूपितव्याप्तिग्रहासंभवादितिभावः॥ स्मर्यत इति॥ महानसीयधूमे
वृ॰२ धूमत्वं धर्मितावच्छेदकीकृत्यव्याप्त्यनुभवः ततः पर्वतीयधूमैज्ञानात् एकसंबंधिज्ञानमपरसंबंधिस्मारकमितिन्या
येन तादृशव्याप्तेः स्मरणे जाते च व्याप्तिस्मरणेविशेषणज्ञानात् वह्निव्याप्योयं धूमः पर्वतवृत्तिरितिव्याप्त्यंशेउ
पनीतभानात्मकं प्रत्यक्षं ततश्चानुमितिरित्यखंडलार्थः॥ नचमहानसीयधूमवृत्तिव्याप्तेः पर्वतीयधूमेऽसत्त्वा
मा त्कथं तत्स्मृतेरितिवाच्यं॥ यद्धीशब्दसौ नाधिकरणाः सर्वेषां धूमसमानाधिकरणास्तद्वृत्तिर्भिन्नश्च तद्धर्मवत्त्वं त र्मे
पि॰६ द्धर्मएवसर्वपर्यालोचनया धूमत्वस्यैवव्याप्यतावच्छेदकत्वात्तस्य पर्वतीयधूमेऽपिसत्त्वात्॥ नन्वेवं धूमत्वस्यैवव्या
प्तत्वे तस्यव्याप्त्यवच्छेदकत्वानुपपत्तिः॥ अत्रेदं अवच्छेद्यावच्छेदकत्वानभ्युपगमादितिवाच्यं॥ कारणतावच्छे घ७
दकारणतावच्छेदकपो॥ दंडत्वदंडत्वोपहितानुपहितत्वभेदादेव तस्य समर्थनीयत्वात्॥ अत एव परामर्शग्रंथेऽस्य
तव्याप्तेः पक्षवृत्तित्वधूमेसत्त्वादेकैवहि सा व्याप्तिरित्यनेन चिंतामणिकारेणापि तथोक्तं॥ नचयोप्यत्रपूर्वमवग
तः स एव तत्र संस्कारवशात् यथार्थस्मृतेः सत्त्वात्तदुक्तिनियमात् पर्वतीयधूमे पूर्वं व्याप्तेरवगमात्कथं तत्र व्या न५
प्तेरुपनीतभानं॥ यत्र चंदने सौरभं घ्राणेनोपलब्धं तत्रैव चक्षुषा सुरभिचंदनमित्युपनीतभानं॥ अन्यत्रत्वनु
मानादितिवाच्यं॥ पक्षधर्मविच्छेदेन पक्षधर्मत्वं तद्धर्मावच्छेदेनतदुपनीतभानमित्येवनियमात्॥ अस्ति चात्र धूम
वत्त्वेन व्याप्तेर्ग्रहात् धूमत्वेनैव व्याप्तेरुपनीतभानमिति॥ इदं तु सामान्यलक्षणानंगीकारेणोक्तं॥ व
स्तुतस्तु॥ सामान्यलक्षणांगीकारेण व्याप्तेर्ज्ञानात्पि तादृशनियमाभ्युपगमेऽपि न क्षतिः॥ महानसीयधूमे

क्ष

धूमत्वेन वह्निव्याप्तिज्ञानं जायमानं धूमत्ववह्नित्वसामान्यलक्षणया यावद्धूमवह्निज्ञाने यावद्वह्निनिरूपितया
यावद्धूमनिष्ठव्याप्तिज्ञानमेव जायत इति पर्वतीयधूमेपि व्याप्तेः स्वगृहीतत्वेन तदुपनीतभानेन बाधकाभावादनुमिति
रुपपन्नैवेत्याशयेनाह ॥ यद्वेति केचित् ॥ उक्तेत्यादि । महानसीयधूमनिष्ठा व्याप्तिस्तत्रैव गृहीता ततः पर्वतीय
धूमे धूमत्वदर्शनात् महानसीयधूमनिष्ठव्याप्तेरेव स्मरणं ततः पक्षधर्मताज्ञाने महानसीयधूमनिष्ठव्याप्त्युप
नीतभानात्तच्च अनुमितिरित्यर्थः ॥ तथा च भ्रमात्मकपरामर्शादिनानुमितिरिति भावः । ननु सल्लिंगपरामर्शस्यै
व व्याप्तित्वेन सल्लिंगपरामर्शस्यैव प्रमानुमितिहेतुतया यथार्थपरामर्शत्वाभावे कथं प्रमात्मिकानुमितिरित्यत आह ॥
यद्वेत्यादि ॥ तदसत् ॥ धूमत्वस्यैव व्याप्तित्वेन सल्लिंगपरामर्शस्यैव पूर्वकल्पेपि संभवात् ॥ यद्यपि यत्समा
नाधिकरणात्यन्तत्वं व्याप्तिरित्युक्तेर्व्याप्तेर्नानात्वमपि ग्रंथकृदभि[illegible]हितं तथापि पर्याप्तिविशेषेति द्वितीयलक्ष
णस्यैव निर्दुष्टत्वे तदभिप्रायेण सल्लिंगपरामर्शमादायैव योजयितुं शक्यत्वे भ्रमात्मकपरामर्शमादाय ॥ न ५
उक्तकुसृष्टेरनादरणीयत्वात् । इति न किंचिदेतत् ॥ धूमत्वसामान्यलक्षणप्रत्यासत्त्येति ॥ अत्र च ज्ञायमानं सा
मान्यं प्रत्यासत्तिर्बोध्या ॥ तच्चेंद्रियसंबद्धं तथा । तेन निमीलितनयनस्य न सामान्यलक्षणाप्रत्यासत्तिजन्य लक्षणया
ज्ञानापत्तिः ॥ तथा चेंद्रियसंयुक्ते धूमे धूम इति ज्ञानानंतरं धूमत्वसामान्येन यावद्धूमविषयकं धूमा इत्याकारकं
ज्ञानं जायते ॥ इंद्रियसंबंधश्च न संयुक्तसमवायः ॥ घटीपटत्वे घटसत्त्वमानंतरं घटा इति ज्ञानानुत्पत्तेः

105

ति॰त स्या १

तयाच तद्धुत्तरं पल्लीपटत्वे यमत्वेन व्याप्तिग्रहाज्ञायमानायावह्न्यनुमितेरुद्देश्यसंभवात् पर्वतीयधूमे आन्यग्रहा किंतु इंद्रियसंबद्धविशेष्यक
ज्ञानप्रकारत्वरूपो वा ज्ञानिकां संबंधो यः स इंद्रियसंबंधे घस्याचलौकिकसंबंधः ॥ तेन निर्मीतनयनत्वेन तदापत्तिः ॥ ज्ञानं च तदिंद्रियजन्यं ग्राह्यं ॥ तेन न ३
पुरोवर्तिनि षष्ठे विशेषदत्वप्रमाणस्मर्यमाणघटत्वेन नयादृष्टचाक्षुषापत्तिः ॥ इदं च बहिरिंद्रियस्थले बोध्यं ॥ तेन तथाविधमानसादृश्येऽपि क्षतिः ॥ अत्रे च सा
यमानसामान्यस्य प्रत्यासत्तित्वे यत्र नानाकपालेषु एकः घटः प्रत्यासन्नस्तत्र तद्घटनाशदशायां तद्घटत्वसामान्यलक्षणया यावद्घटवतां ज्ञानं न स्यात् ॥ न च तत्र रसा घा६
घटत्वमेव तद्व्यक्तिसंबंधेन परंपरया प्रत्यासत्तिरिति वाच्यं ॥ यत्र तद्व्यक्तिसंबंधेन परंपरया न घटत्वादिमानं किंतु तत्र व्यक्तित्वेन तत्तद्व्यक्तिप्रकारेण तद्व्य
किंमतोज्ञानं तच्चोत्पत्तिसंभवात् ॥ न च परंपरया तद्व्यक्तित्वमेवात्र प्रत्यासत्तिरिति वाच्यं ॥ तत्र व्यक्तित्वस्य तत्तद्व्यक्तित्वेन प्रवेशकतया तस्यापि नष्टत्वादिति ॥ तथा
विघसामान्यज्ञानं प्रत्यासत्तिर्बोध्या ॥ तत्र घटत्वाश्रयतावत्त्वव्यक्तित्वस्य प्रत्यक्षे इंद्रियसंबंधविशेष्यकज्ञानप्रकारीभूतघटत्वत्वेन तथाविधघटत्वज्ञाने
नवानहेतुतायां विषयकत्वस्य कार्यतानवच्छेदकत्वेऽपि विनिगमनाविरहेण पादिविषयकत्वस्याप्रविष्टसंपन्नस्येचेन तन्निवेशप्रयोजनाभावात् ॥ घस
घट १ योगाजन्यस्वविषयकज्ञानाजन्यघटत्वातिरिक्तो घटवृत्तिधर्मप्रकारकप्रत्यक्षसंप्रति तथाविधघटत्वत्वेन ज्ञानत्वे वा हेतुता निर्विकल्पकोत्तरोत्पन्न न्य ८
घटप्रत्यक्षेऽव्यभिचारवारणाय संयोगाजन्यत्वनिवेशः ॥ पटत्वेन घटज्ञानानंतरं पत्र घटवदिसुपनीतमाने तत्र पटत्वेन घ
टप्रत्यक्षोदयात्तत्र घटत्वज्ञानासाधारण्यसिद्धेर्वारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः ॥ द्रव्यत्वसामान्यलक्षणाजन्यप्रस
ट ७ क्षकारणाय घटत्वातिरिक्तो साधारणेति चेन्न ॥ तथासति घटत्वद्रव्यत्वयोः समसमनियतत्वेन स्थले परस्परकार्यकारणभावाप
त्वेः ॥ किंतु घटत्वादिप्रकारतानिरूपितत्वे लौकिकान्यघटादिमुख्यविशेष्यतानाशालिचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषप्रत्य
५दि दि ५ रीत्या तु घटत्वत्वेनाघटत्वोप्रकारताशालिचाक्षुषत्वादिना वा हेतुता बोध्या ॥ अत्र धर्मे विषयत्वसमवायघटितसामानाधि
करणं ॥ द्वितीयं च समवायघटितसामानाधिकरण्यं प्रत्यासत्तिः ॥ विशेष्यतायां घटत्वप्रकारतानिरूपितत्वनिवेशः ॥
द्रव्यत्वादिसामान्यलक्षणाजन्यज्ञानेन व्यभिचारः ॥ निर्विकल्पकानन्तरोत्पन्नघटमुख्यविशेष्यकलौकिकचाक्षुषे व्य
भिचारवारणाय विशेष्यतायां लौकिकान्यत्वनिवेशः ॥ घटत्वप्रकारकघटस्मरणजन्यघटाद्युपनीतमाने घटत्वप्रका
रकचाक्षुषपरत्वात् कारणविरहाद्व्यभिचारवारणाय विशेष्यतायां मुख्यत्वनिवेशः ॥ मुख्यविशेष्यतात्वं च प्रकारतापवि

शेष्यतायां बहिरिंद्रियजन्यज्ञाने उपनीतं विशेषणतयैव भासते॥ मानसे त्वनियमात्॥ विशेषणतयैव घटादेर्ज्ञानं न तु मुख्यवि
शेष्यतयेति॥ कारणतावच्छेदककोटौ घटत्वादिप्रकारताकत्वनिवेशान्न निर्विकल्पकोत्तरं सामान्यलक्षणाजन्ययाव
द्घटप्रत्यक्षापत्तिः॥ पुरोवर्तिनि दोषवशान्नयनेनागृह्यमाणे स्मरणप्रकारीभवता घटत्वेन यावद्घटचाक्षुषवारणा
स्मरण४ य चाक्षुषत्वनिवेशः॥ समवायेन घटत्वप्रकारकज्ञानत्वकालिकादिसंबंधेन घटत्वाश्रययावद्व्यक्तिप्रत्यक्षाप
त्तिवारणाय संबंधविशेषोपि निवेशनीय इति प्राचीनमते निष्कर्षः॥ नवीनमतं दर्शयितुं शंकते॥ नन्विति॥ तदाश्रये
ति॥ सामान्याश्रयेत्यर्थः॥ साक्षात्कारः स्यादिति॥ चाक्षुषसाक्षात्कारः स्यादित्यर्थः॥ तेन मानससाक्षात्कारो
दयेपि न क्षतिः॥ नवीनमतमभिप्रेत्य सिद्धांतयति॥ यत्सामान्यमिति॥ यदित्यस्य सामान्येनात्तेदान्वयः॥ तद्[illegible]का प्र७
रकत दाश्रयेति॥ मानससाक्षात्कारस्य सामग्रीसत्वात्॥ लौकिकेति॥ सामग्री च नयनसन्निकर्षालोकसंयोगादि
रूपा॥ सहकारित्वादिति॥ बहिरिंद्रियजन्यज्ञानसहकारित्वादित्यर्थः॥ विमुद्रितनयनस्य च चक्षुःसंयोगादिरू
पधूमसामग्र्यसत्वान्न प्रत्यक्षमिति भावः॥ न च धूलीपटले धूमभ्रमात् धूमादिति ज्ञानानुदयापत्तिः॥ धूमभ्रम
स्य भ्रमत्वाश्रयलौकिकप्रत्यक्षसामग्र्यभावादिति वाच्यं॥ तदाश्रयेत्यस्य तद्धर्मप्रकारतानिरूपितविशेष्य
ताश्रयेत्यर्थात्॥ धूमत्वप्रकारतानिरूपितविशेष्यताश्रये धूलीपटले लौकिकप्रत्यक्षसामग्रीसत्वेन दोषात्॥
ननु प्राचीनमते तत्पुरुषीयधूमाश्रयविषयकलौकिकचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयचक्षुःसन्निकर्ष
किंचिद्विशेष्यकतत्पुरुषीयचाक्षुषप्रकारी स्ववत्त्वेन हेतुतया तेनैव विमुद्रितनयनस्यापि प्रत्यक्षापत्ति

१०७

तथा च तदुत्तरं धूलीपटले धूमत्वेन व्याप्तिग्रहाज्जायमानाया वह्न्यनुमितेः संदेहप्रसंगात् पर्वतीयधूमे व्याप्त्यग्रहात्॥ किंतु इंद्रियसंबद्धविशेष्यक
ज्ञानप्रकारत्वरूपो वेज्ञालिकासंबंधो यथा यो इंद्रियसंबंधस्य चालौकिकसंबंधः॥ तेन निमीलितनयनस्य न तदापत्तिः॥ ज्ञानं च तदिंद्रियजन्यं ग्राह्यं॥ तेन
पुरोवर्तिनि घटे विशेष्ये लक्ष्यमाणस्मर्यमाणघटत्वेन न यावद्घटचाक्षुषापत्तिः॥ इदं च बहिरिंद्रियस्थले बोध्यं॥ तेन तथाविधमानसादावपि न क्षतिः॥ अत्र च सा न ३
मानसामान्यस्य प्रत्यासत्तित्वे यत्र नानाकपालेषु एकः घटः प्रत्यासन्नस्तत्र तद्घटनाशदशायां तद्घटत्वसामान्यलक्षणया यावद्घटत्वतां ज्ञानं न स्यात्॥ न च तत्र
त्वमेव तद्व्यक्तिसंबंधेन परंपरया प्रत्यासत्तिरिति वाच्यं॥ यत्र तद्व्यक्तिसंबंधेन परंपरया न घटेत्यादि ज्ञानं किंतु तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिप्रकारेण तद्व्य रसा घा ६
क्तिमत्ता ज्ञानं तत्र गत्यसंभवात्॥ न च परंपरया तद्व्यक्तित्वमेव प्रत्यासत्तिरिति वाच्यं॥ तत्र व्यक्तित्वस्य तद्व्यक्तिरूपैकतया तस्यापि नष्टत्वादिति॥ तथा
विधसामान्यज्ञानं प्रत्यासत्तिर्बोध्या॥ तत्र च घटत्वाश्रययावद्व्यक्तिप्रत्यक्षे इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतघटत्वत्वेन तथाविधघटत्वज्ञानं हे
नवानहेतुतायां तद्विषयकत्वस्य कार्यतानवच्छेदकत्वेऽपि विनिगमनाविरहेण यादृशविषयकत्वस्यापि विषयसंपन्नस्यैव न तन्निवेशे प्रयोजनाभावात्॥ घटस
घट१ योगाजन्यस्वविषयकज्ञानाजन्यघटत्वातिरिक्तघटवृत्तिधर्मप्रकारकप्रत्यक्षसंप्रति तथाविधघटत्वत्वेन ज्ञानत्वेनैव हेतुता॥ निर्विकल्पकोत्तरोत्पन्न
घटप्रत्यक्षे व्यभिचारवारणाय संयोगाजन्यत्वनिवेशः॥ पटत्वेन घटज्ञानानंतरं यत्र पटवृत्तिः सुपनीतभाने तत्र पटत्वेन घ
टप्रत्यक्षादयात्र घटत्वज्ञानाभावाद्व्यभिचारवारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः॥ द्रव्यत्वसामान्यलक्षणाजन्यप्रत्य न्य ८
ट ७ क्षवारणाय घटत्वातिरिक्तेत्यादि॥ न चैवं तथापि घटत्वद्रव्यत्वोः समसमनियतत्वेन तत्र परस्परकार्यकारणभावाप
त्तेः॥ किंतु घटत्वादिप्रकारतानिरूपितलौकिकान्यघटादिमुख्यविशेष्यताशालिचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषप्रत्य
५दि दि५ क्षत्वे घटत्वत्वेनाघटत्वप्रकारताशालिचाक्षुषत्वादिनावा हेतुता बोध्या॥ प्रथमे विषयत्वसमवायघटितसामानाधि
करण्यं॥ द्वितीये च समवायघटितसामानाधिकरण्यं प्रत्यासत्तिः॥ विशेष्यतायां घटत्वप्रकारतानिरूपितत्वानिवेशा
द्द्रव्यत्वादिसामान्यलक्षणाजन्यज्ञानेन व्यभिचारः॥ निर्विकल्पकानंतरोत्पन्नघटमुख्यविशेष्यकलौकिकचाक्षुषव्य
भिचारवारणाय विशेष्यतायां लौकिकत्वनिवेशः॥ घटत्वप्रकारकघटस्मरणजन्यघटाद्युपनीतभाने घटत्वप्रका
रकचाक्षुषप्रकारकत्वविरहाद्व्यभिचारवारणाय विशेष्यतायां मुख्यत्वनिवेशः॥ मुख्यविशेष्यतात्वं च प्रकारतान्यवि

कारणे गुरुतरसामग्र्याः सहकारित्वकल्पने नव्यमते गौरवमिति चेन्नैव ॥ अंधे तमसि सौदामिनीसंपातजनितद्रव्यविषयक
चाक्षुषोत्तरं आलोकसंयोगविगमेऽपि तादृशकारणसत्त्वात् सकलद्रव्यसाक्षात्कारधारायाः आपत्तेः तादृशसामग्र्याः स
हकारित्वकल्पनावश्यकत्वात् ॥ एवं धूमत्वाश्रयप्रत्यक्षे ज्ञानप्रकारीभूतधूमत्वत्वेनैव हेतुत्वं न त्विंद्रियभेदेन पुरुषभे
देन वा कार्यकारणभावद्वयेऽपि लाघवं ॥ अथैवं चक्षुःसंनिकृष्टपुरोवर्तिनि घटे ग्रहप्रतिबंधकदोषसत्त्वे घटत्वस्मर त्व४
णबलात् यावद्घटचाक्षुषापत्तिः । न च तदाश्रयत्वस्य तद्धर्मविशिष्टत्वार्थः । तथा च तद्धर्मविशिष्टे लौकिकप्रत्यक्षसा
मग्र्याः सहकारित्वात्तद्धर्मांशेऽपि लौकिकप्रत्यक्षसामग्र्याः सहकारित्वकल्प्ये प्रकृते घटत्वांशे दोषात्तावद्घटेतरसा
मग्र्यसत्त्वान्न घटत्वाश्रययावत्प्रत्यक्षापत्तिरिति वाच्यं ॥ तथा सति धूलीपटले धूमभ्रमानंतरं धूमानुमितिज्ञा
नानुदयापत्तेः । धूमत्वांशे लौकिकप्रत्यक्षसामग्र्यसत्त्वादिति चेन्न ॥ तत्रापि यावद्घटचाक्षुषस्वीकारे इष्टापत्तेरिति न
व्यमतनिगर्वः ॥ अत्र केचित् ॥ ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारे सुरभिचंदनमित्यादौ सौरभादिज्ञानानिर्वाहात् तत्स्वीका त्वा ८
रेप रः । सौरभत्वसामान्यलक्षणया सौरभभाननिर्वाहे सौरभत्व[illegible]भावेन सौरभत्वज्ञानस्य सामान्यल
क्षणयानिर्वाहासंभवात् ॥ अत एव दीधितिकृत् सुरभिचंदनमित्यादौ सौरभत्वादेरपि ज्ञानमित्याह ॥ तन्न सं त्वप्रकारक ५
गच्छते ॥ सौरभत्वप्रकारकसौरभत्वविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रति सौरभसंनिकर्षत्वेन सामान्यलक्षणाजन्यप्र
त्यासत्तेर्हेतुत्वोपगमेन सौरभत्वधर्मिज्ञानाभावेऽपि सौरभज्ञानबलादेव सौरभत्वभानोपपत्तेरिति ज्ञानल
क्षणाप्रत्यासत्तिस्वीकारो निरर्थकः ॥ अथ सामान्यलक्षणया प्रत्यक्षजननीयतद्धर्मप्रकारतानिरूपित
विशेष्यतांशे लौकिकप्रत्यक्षसामग्र्याः सहकारित्वात् तां विना कथं सामान्यलक्षणया सुरभिचंदनमित्यादौ सौ
रभस्य सौरभत्वस्य वा भानमिति ज्ञानलक्षणास्वीकार आवश्यक इति चेन्न ॥ सामान्यलक्षणया तद्धर्माश्रयमुख्यवि

१०७

शेष्यताशाल्यलौकिकप्रत्यक्षजननीये एवं तदाश्रयलौकिकप्रत्यक्षसामग्र्याः सहकारित्वादत एव तदभावेऽपि सौ
रभविशेषणकालौकिकप्रत्यक्षजनने बाधकाभाव इत्याकूतम् ॥ यत्र सौरभत्वांशे उपनीतज्ञानात्मकं सौरभत्व
प्रकारकं चंदनविशेष्यकं सौरभं चंदनमिति भ्रमात्मकं ज्ञानं तत्र सौरभत्वज्ञानं सौरभत्वज्ञानरूपसामान्यलक्षणया
न निर्वहतीति सौरभत्वप्रकारतानिरूपितसौरभनिष्ठविशेष्यताशालिज्ञानत्वस्यैव सौरभत्वज्ञानरूपायाः सामा
न्यलक्षणाप्रत्यासत्तेः कार्यतावच्छेदकत्वात् ॥ ननु तौ दीधितिकृता इत्थं च धर्मविषयकज्ञानं धर्मिणां प्रत्यासत्तिरि
तरानुयीद्वयकं ज्ञानं तस्यैवेति तथा च चंदनस्य सौरभत्वानाश्रयत्वेन तत्र सौरभत्वज्ञानार्थं ज्ञानलक्षणास्वीकार
आवश्यकः ॥ न च तत्र दोषबलादेव सौरभत्वभानमिति वाच्यं ॥ प्रत्यक्षस्येंद्रियसन्निकर्षजन्यत्वनियमेन सौरभत्वां
शे सन्निकर्षस्यावश्यकत्वात् ॥ अत एव रजतत्वांशे लौकिकसन्निकर्षाभावादलौकिकसन्निकर्षस्य सत्त्वान्ना
न्यथाख्यातिरिति प्राचामाकूताः ॥ तथा च तादृशनियमस्य सर्वसिद्धत्वात्सौरभत्वभानार्थं ज्ञानलक्षणास्वीका
र आवश्यक इति ॥ ननु व्याप्तिज्ञानस्यानुमितिहेतुत्वसंभवेऽपि कीदृशं व्याप्तिज्ञानकालेऽप्यनुमित्यापत्तिरित्याशंकते ॥
नन्वीति ॥ ननु पक्षवृत्तिधर्मविशेष्यकं व्याप्तिज्ञानं कारणं तत्र पक्षवृत्तिधूमो वह्निव्याप्य इत्याकारकं तत्सत्त्वे
चानुमित्युत्पत्तौ कस्याप्यविवाद इत्याशयेनाशंकते ॥ नन्वेति ॥ सर्वत्र धूमेति ॥ पक्षवृत्तित्वावगाहिज्ञानं का
रणमिति तावद्वक्तव्यं वह्निव्याप्यधूमवान् पर्वत इति ज्ञानादप्यनुमित्यापत्तेः तत्राधेयत्वप्रतीतौ ज्ञाने मानाभा
स्क०२ वात् ॥ किंतु व[illegible]गत्या पक्षवृत्तिविषयकं तत्त्वं च धूमो वह्निव्याप्य इत्यत्रापि धूमत्वेन पर्वतीयधूमविषयकत्वाद
ज्ञानमित्यतस्ततोऽनुमित्यापत्तिरिति भावः ॥ यत्तु दृष्टांते धूमो वह्निव्याप्य इति ज्ञानाद्दृष्टांतेऽनुमित्यापत्तिरित्याशंकते ॥

५८

नन्वीनत्तदुष्टं। दृष्टांतेमहानसादौवह्निमत्त्वाज्ञानसत्त्वेनपक्षताविरहादेवानुमितेरनुदयादन्यथासिद्धांतैर्गतेः।
नहिव्याप्यस्य सरूपेणपक्षतावैशिष्ट्यहेतुमत्तानिश्चयःकारणमितितदर्थः॥ तथासतिपक्षतायाः परामर्शकुक्षि
नुपप ३ क्षेपापत्त्याकारणतावच्छेदकतापत्त्याकरणत्वोपगतेः॥ किंतुपक्षत्वंसाध्याधिकरणत्वमेव तथाचव्याप्तिविशिष्टवै
शिष्ट्यावगाहिज्ञानंकारणमित्यर्थोऽस्यनेतत्तुमहानसादावपिसंभवत्येवेतिपक्षताविरहान्नतत्रानुमितिरित्यु
पेयं॥ द्रव्यत्वेनेति॥ एकरूपावच्छिन्नव्याप्तिपक्षधर्मतावगाहित्वमनत्वेनहेतुत्वोक्तौ तु वह्निव्याप्यवानितिज्ञाना
दनुमित्यनापत्तिरितिभावः॥ व्याप्यत्वप्रकारेणेति॥ व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानंकारणमित्यर्थः॥
भि नन्वेवंखंडशःअव्यभिचारसहचारयोर्ग्रहेऽव्यभिचारितवह्निसहचरितधूमवानितिज्ञानात्॥ एवंविशिष्टे
विशेषणंतत्रापिविशेषणांतरमितिन्यायेनवह्निव्याप्यधूमवानयमितिज्ञानादनुमित्यनापत्तिरितिचेन्न॥
व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनलाघवेनकारणत्वेसिद्धेतत्रानुमित्यसत्वेदृष्टापत्तेः॥ लाघवंचव्या
प्यंशेनिश्चयत्वानिवेशेन॥ अन्यथावह्निव्याप्तिवह्निव्याप्यसाध्यधूमवान्पर्वतइतिव्याप्यंशेसंशयात्मकज्ञाना
दनुमित्यापत्तेः॥ व्याप्यंशेनिश्चयात्मकतादृशज्ञानत्वेनकारणत्वेऽप्यैतिगौरवान्मन्मतेतुविशिष्टवैशिष्ट्यावगाहि उ ४
बोधेविशेषतावच्छेदकप्रकारकनिश्चयत्वेनविशेषतावच्छेदकप्रकारकज्ञानाभावत्वेनवाकार्यका[illegible]तितया
कारणत्वेनव्याप्यंशेसंशयात्मकतादृशज्ञानविशिष्टवैशिष्ट्यविषयकत्वाभावेनैवापत्त्यभावादितिदिक्॥ व्या शे २
प्तिविशिष्टवैशिष्ट्यावगाहित्वंचव्याप्यवच्छिन्नप्रकारतानिरूपितपक्षनिष्ठविशेष्यताशालित्वं॥ नचव्याप्य
पक्षीयंचयवैशिष्ट्यावगाहित्वंनतु॥ व्याप्यवच्छिन्नविषयतानिरूपितपक्षनिष्ठविषयताशालित्वमितियावत्॥

ता ५ मा व ४ ८ ४

प्पो १

नर्कप्र॰ प॰ ५

अनु॰
प॰ ५

र्वंचवह्निव्याप्योधूमःपर्वतइत्याधेयतासंसर्गकपर्वतप्रकारकत्वात्तस्यापिसंग्रहइतिवाच्यं अप्रामाण्यज्ञानदस्यो
त्तेजकत्वानुरोधेनानिश्चयपदस्यनिवेशानुरोधेनचवयोःपृथगेवहेतुतायाश्चैक्यसत्त्वेनावश्यकत्वात्॥
म३ अथएकविधपरामर्शसत्त्वेऽन्यविधाप्रामाण्यज्ञानसत्त्वेऽनुमित्यनापत्तेः॥ मिथोविशेषणविशेष्यभावेविनिगमना
विरहेणचनानासंबंधावच्छिन्ननानाधर्मावच्छिन्नावच्छेदकतायाश्चैक्यासत्त्वेनावच्छेदकतायाश्चव्यासज्य
वृत्तित्वासंभवात्॥ नन्वेवंवह्निव्याप्योधूमःपर्वतइतिज्ञानादनुमित्यनुदयापत्तिःपूर्वत्रोक्तविशिष्टवैशिष्ट्या
वगाहित्वसत्त्वादितिचेन्न। तस्यापिस्वातन्त्र्येणहेतुत्वोपगमात्॥ अव्यवहितोत्तरत्वनिवेशेनचपरस्परजन्या
नुमितौनव्यभिचारः॥ वस्तुतस्तु। अनुमितेःपक्षविशेष्यकत्वनियमेनाण्रपिविशेषोव्यवसायकरहतिन्या
येनपक्षविशेष्यकपरामर्शएवहेतुर्नव्याप्यविशेष्यकोपीतिध्येयं॥ उक्तातिप्रसंगंवारयति। नचेति। नन्वेवं
वह्निव्याप्योधूमःधूमवान्पर्वतइतिज्ञानादनुमित्यनुदयापत्तिरितिवाच्यं। तदुत्तरपरामर्शांगीकारेणतदुपपत्तेरि
तिभावः॥ निश्चयपदमिति॥ निश्चयत्वंचनतदभावाप्रकारकत्वेसतितत्प्रकारकत्वं। तथाचशुद्धपर्वतत्वावच्छिन्न व्या५
विशेष्यतानिरूपितवह्निव्याप्य[illegible]धूमाभावप्रकारता[illegible]न्यत्वेसतिशुद्धपर्वतत्वावच्छिन्नविशे ता४
ष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिज्ञानत्वेनपर्वतोद्देश्यकवह्निविधेयकानुमितौहेतुत्वंनातःपर्वतो
वह्निव्याप्यधूमाभाववान्पर्वतोवह्निव्याप्यधूमवांश्चेतिनिर्णयसंग्रहायप्रथमशुद्धत्वनिवेशः॥ नीलपर्वतो
वह्निव्याप्यधूमवान्नवेतिसंशयवारणायद्वितीयशुद्धत्वनिवेशः॥ नीलपर्वतोवह्निव्याप्यधूमवानितिनिश्च

यस्य च तादृशानुमितौ स्वातंत्र्येण हेतुतया न ततोऽनुमित्यनुपपत्तिः॥ अथ पर्वतत्वसामानाधिकरण्येन धूमधूमा
भावावगाहि वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभाववांश्च पर्वत इति ज्ञानं तदानुमित्यनापत्तिरिति चेन्न॥
धर्मितावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः अवच्छेदकावच्छेदेनान्यतरकोट्यव
गाहिज्ञानं संशय इति नियमात् तथा च पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्ताज्ञानस्य हेतुतायां पर्वतत्व
व्यापकत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारतान्यत्वनिवेशः॥ पर्वतत्वावच्छेदेन व
ह्निव्याप्यवत्ताज्ञानस्य हेतुतायां च शुद्धदैशिकविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारकताशून्य
त्वनिवेश इति संक्षेपः॥ अनुमितिं प्रति परामर्शत्वेन हेतुत्वे कारणताघटकानन्यथासिद्धत्वनियतपूर्ववर्तित्व
रूपधर्मद्वयं विशिष्टपरामर्शत्वावच्छेदेन कल्पनीयं॥ वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानद्वयस्यानु
प्रति मितिंहेतुत्वे तु परामर्शहेतुत्वेन क्लृप्तनियतपूर्ववर्तितावच्छेदकस्य तस्यैवानन्यथासिद्धत्वमात्रं कल्प्यते॥ तथा च
विशिष्टपरामर्शत्वेन हेतुत्वमसंभवदुक्तिकमिति निष्कृष्य मीमांसकमतं दर्शयति॥ मीमांसकास्त्वित्यादिना॥
व्याप्यतावच्छेदकेति॥ व्याप्यतावच्छेदकत्वेनागृहीतो यो धर्मस्तादृशप्रकारकं पक्षधर्मताज्ञानमित्यर्थः॥ अत
एवानुपदं तद्रूपेण व्याप्तिग्रहादीति वक्ष्यति॥ ययोक्तं तेष्वप्यंशे भ्रमात्मकज्ञानादनुमित्यनुदयापत्तिः॥ त
त्र वस्तुगत्या व्याप्यतावच्छेदकत्वाभावात्॥ व्याप्तिज्ञानेन व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञाने सहकारितादशाव्या
ह्निज्ञानेनानुमितौ जननीयो सहकारि धूमो वह्निव्याप्यो द्रव्यं पर्वतवदिति ज्ञानादनुमित्यापत्तिं वारयति॥

पं।५

तर्क०प्र०५३

अनु० ५३
प्रकाशे

व्याप्यतावछेदमिति ।। व्याप्यतावछेदकतया गृहीतमित्यर्थः ।। स्वमते लाघवं दर्शयति ।। एवंचेति ।। ज्ञानद्वयाद
पीत्यपिनावह्निव्याप्यधूमवान्पर्वतइतिज्ञानसंग्रहः ।। तथा च नैय्यायिकमते ज्ञानद्वयात्परामर्शं कल्पयित्वाऽनुमि
तिस्वीकारे गौरवमिति भावः ।। लाघवादिति ।। विशिष्य निश्चयत्वरूपलघुकधर्मावछिन्नान्यथासिद्धत्वक
ल्पनायाः गुरुधर्मद्वयावछेदेनानन्यथासिद्धत्वकल्पनापेक्षया लघुत्वादित्यर्थः ।। ननु कारणतावछेदकलाघ
वेनापि यत्र धूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानं ततः अनुमितिस्तत्र स्ववता विशिष्टपरामर्शं कल्पयित्वाऽनुमिति
कल्पनेन तज्ज्ञानद्वयसाध्यकल्पने गौरवं लक्षणाधिक्यं च स्यात् अत आह ।। किंचेति ।। वह्निव्याप्यवानिति ।। व्याप्य
तावछेदकधूमत्वादिनात्राज्ञानादित्यर्थः ।। तथा च लाघवाद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वरूपलघु
कधर्मावछेदेन कारणत्वे सिद्धे यत्र तादृशज्ञानद्वयं तत्राप्यन्तरा विशिष्टपरामर्शं कल्पयित्वाऽनुमितिस्वीकारः
लाघवानुरोधेन क्षणविलंबस्यापि न्याय्यत्वात् ।। फलमुखगौरवस्यादोषत्वात् ।। मीमांसकमते तु व्याप्त्यं
शे निर्धर्मितावछेदकाद्वह्निव्याप्यवानिति शाब्दपरामर्शात्सर्वथैवानुमित्यापत्त्यापदीति ।। वस्तुतस्तु व्याप्य
तावछेदकप्रकारकव्याप्तिज्ञानव्याप्यतावछेदकप्रकारकपक्षधर्मताज्ञानयोर्हेतुत्वेऽपि वह्निव्याप्यो धूमः आ
लोकवान्पर्वत इति ज्ञानादनुमित्यापत्तिः ।। आलोकत्वस्य वस्तुगत्या व्याप्यतावछेदकत्वात् ।। व्याप्यतावछे
दकत्वेन गृह्यमाणधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वेऽपि तथाऽऽलोकत्वस्यापि कदाचिद्व्याप्यतावछेदक
त्वेग्रहात् ।। तत्कालीनतद्रूपाय व्याप्यतावछेदकत्वप्रकारकग्रहविषयधर्म इत्युक्तौ तत्कालीनत्वरूपायत्व

निवेशगौरवात्॥ एतेन गृह्यमाणव्याप्यतावच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मतायांप्रकारीस
वद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वेन वा एकधर्मेणमयापिकारणत्वं कल्प्यते इत्यपि परास्तं॥ कालादेरप्रवेशेगौर
वादिति॥ धूमत्वप्रकारकव्याप्तिज्ञानत्वेन धूमत्वप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वं वाच्यं॥ तथा च वह्निव्याप्यो धूमः
धूमवान्पर्वत इति ज्ञानद्वयस्य न तावत्पर्वतोद्देश्यकवह्निविधेयकानुमितौ इति सामान्ये नियतपूर्ववर्तित्वं क्व संवह्निव्या
प्यालोकवान्पर्वत इति परामर्शजन्यतादृशानुमितौ तयोरसत्वात्॥ किंतु अनुमितिविशेषे तयोर्हेतुत्वे तु विशेषप
रामर्शस्यापि वह्निव्याप्यवानिति शाब्दपरामर्शजन्यानुमितावसत्त्वेवेति किं लाघवं तन्मत इति न जानीमह इति दिक्॥
ननु व्यभिचारज्ञानकालेऽपि निर्धर्मितावच्छेदकव्याप्यवत्तापरामर्शसंभवेनानुमित्यापत्तेर्व्यभिचारस्य हेत्वाभा
सत्वानुपपत्त्या हेतुतावच्छेदकमनिवेश्य निश्चयत्वनिर्वचनानुपपत्त्या व्याप्तेर्निवेष्टुमशक्यतया च हेतुतावच्छेदकग
र्भव्याप्यवत्तापरामर्श एव हेतुर्वाच्यस्तथा च व्याप्यवानिति शाब्दपरामर्शस्थले कथमनुमितिरित्यस्वरसादाह॥
तस्मादिति॥ वह्निव्याप्यवानित्येवंरूपादिति॥ वह्निव्याप्यधूमवानित्येवंरूपादित्यर्थः॥ जसिद्धादेवेत्येवकारेण
मीमांसकाभिमतस्य ज्ञानद्वयनिरासः॥ व्याप्त्यंशे संशयात् पक्षधर्मतांशे संशयाच्चानुमित्यापत्तिवारणाय
व्याप्त्यंशे निश्चयत्वं पक्षधर्मतांशे च निश्चयत्वं निवेशनीयं॥ नैय्यायिकमते व्याप्त्यंशे निश्चयत्वमनिवेश्य व्या
प्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनैव हेतुत्वमुपेयते॥ व्याप्त्यंशे संशयात्मकज्ञानेन ~~[illegible]~~ वि
शिष्टवैशिष्ट्याभावेनैवापत्त्यसंभवादिति पूर्वमेवावेदितत्वात्॥ एवं धर्मद्वयावच्छेदेन हेतुत्वकल्पनात् एकध
र्मावच्छेदेनैव तत्कल्पनमित्यास्तां विस्तरः॥ तृतीयमिति॥ अनुमितिकारणीभूतलिंगपरामर्शस्य तृतीयत्वं क

तर्क॰प्र॰ ५
५५

अनु॰ ५
५५

त्यमित्यर्थः ॥ प्रथममिति ॥ दृष्टांते यद्धूमदर्शनं तत्प्रथममित्यर्थ इत्यन्वयः ॥ ततइति ॥ पर्वते धूमदर्शनानंतरं धू
मो वह्निव्याप्य इति स्मरणात्मकं व्याप्तिज्ञानं द्वितीयमित्यर्थः ॥ तद्विशिष्टेति ॥ व्याप्तिविशिष्टेत्यर्थः ॥ स्मृतायां
व्याप्तौ वह्निव्याप्यधूमवान्पर्वत इति ज्ञानमेव तत्तृतीयमित्यर्थः ॥ केचित्तु ॥ दृष्टांते धूमदर्शनं प्रथममित्यर्थः ॥
व्याप्तिज्ञानं दृष्टांतीयधूमस्य व्याप्तिमत्तयाज्ञानं द्वितीयमित्यर्थः ॥ तद्विशिष्टेति ॥ दृष्टांते प्रागनुभूत व्याप्ति
विशिष्टहेतोः पक्षवृत्तित्वावगाहिज्ञानं तृतीयमित्यर्थः ॥ ननु प्रामाणिक इति चेत्त्वावस्तु ॥ गौरवमेवं स्वीकर्तं न दोषा
इति व्याचख्युः ॥ गौरवादिति ॥ लिंगपरामर्शत्वापेक्षया तृतीयलिंगपरामर्शत्वेन हेतुत्वे गौरवादित्यर्थः ॥
ननु प्रामाणिकं गौरवं न दोषायेत्यत आह ॥ व्यभिचारादिति ॥ महानसादौ सिद्धिसत्त्वेपि सिषाधयिषाबला
दनुमित्युत्पत्त्या तत्र तृतीयलिंगपरामर्शाभावेन व्यभिचारादित्यर्थः ॥ फलायोग[illegible]व्यवच्छिन्नत्वं क
प॰६ रणत्वरूपकारणत्वं लिंगस्यापि तत्त्वं विशिष्टकारत्वमसिद्धेस्त्यपरामर्श एवानुमितिकरणमिति केचित्तु ॥ [illegible] ॥ लिंगपरा
मर्शस्यानुमितिहेतुत्वे लिंगस्यापि तत्त्वं विशिष्टकारणताग्राहकप्रमाणमस्ति विबाधके विशेषणस्यापि कारणत्वं ग[illegible]ति
न्यायेन विशेषणीभूत लिंगस्यापि कारणत्वग्रहात् ॥ दंडत्वादेरपि घटकारणतापत्त्यासंत्यंतन्निवेशः ॥ तत्रान्यथा
सिद्धेरेवबाधकत्वात् ॥ एवं विनिगमनाविरहेणापि लिंगस्यानुमितिकरणत्वमित्यामनंत्याचार्याः ॥ तदुक्तमयमतं निराकु
र्वन्नसन्नस्वमतमाह ॥ सोयमिति ॥ व्यापारवत्त्वादिति ॥ फलायोगव्यवच्छिन्नत्वस्य कारणत्वस्य च व्यापारवदसा
धारणकारणतापेक्षया गुरुत्वेनाहेतुत्वादिति भावः ॥ यथाचैतत्तथाग्रत्यक्षपरिच्छेदे विवेचितं ॥ ननु यत्र परा

परामर्श एवानुमानमिति ॥ एवं लिंगपरामर्शस्यानुमितिहेतुत्वे

मर्शानंतरं लिङ्गिनाशात्तोनुमितिः तत्र योग्यविभुविशेषगुणत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नगुणत्वेन हेतुतया परा
मर्शस्यापि लिङ्गिनाशरूपव्यापारवत्करणत्वसंभवस्येवेति चेन्न। यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तद्व्यापारत्वमि
ति नियमेन तज्जातीयेऽन्यत्र तथात्वासंभवेन तस्यानुमानत्वेनांगीकारस्यासंभवित्वादिति॥ लिंगमिति॥ अनुमि
तिकरणमित्यनुषज्यते परामर्शव्यापारकमित्यनेन करणलक्षणसत्वं सूचितं॥ सनेति॥ अतीतानागतधूम
विषयकोयत्र भ्रमो न सोऽपि वह्निव्याप्यवत्तापरामर्शस्तत्रानुमितेरनुदयापत्तेरित्यर्थः॥ न च तत्र तत्प्रागभावादीना
मेव लिंगत्वमास्तामिति वाच्यं॥ तेषां तु व्याप्यत्वेन चायाऽपरामृश्यमाणत्वादिति भावः॥ ननु यदीति लिंगस्थले
नुमितिपूर्वं तस्य सत्वेन हेतुत्वमक्षतमत आह॥ अनन्यथेति॥ अनुमित्यव्यवहितपूर्वक्षणावच्छेदेन न तत्सत्वमि
ति भावः॥ ननु कारणत्वं कार्याव्यवहितपूर्वक्षणावच्छेदेन कारणतावच्छेदकसंबंधावच्छिन्नकार्याधिकरणवृ
त्त्यभावप्रतियोगितानवच्छेदकधर्मवत्वं तच्चातीतानागतस्थलेऽनुमित्यव्यवहितपूर्वं धूमासत्वेनापि तद्धे
कोपबंधावच्छिन्नप्रतियोगितोऽभावस्यासंभवात्क्षुण्णमेवात यदीह॥ ततावन्नादृशातीतौ ध्वंसप्रागभावौ सत्वतः॥ हेतू तयोः सर्वथा
संबंधावच्छिन्नप्रतियोगिताकत्वे सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे च मानाभावेन तथात्वासंभवात्॥ सत्वे प्रमा
णसत्वे वा एकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरनभ्युपगमात्॥ धूमाधिकरणतयोरन्यथा
त्वासंभवात्॥ व्याप्यत्वं तत्ताभावः प्रतियोगि[illegible]वत् ध्वंसप्रागभावयोरप्येतादृशाभावविरोधित्वादिति चेन्न॥ तयोर्विरोधि
त्वे मानाभावात्॥ अन्यथाऽनतराश्यामे घटे रक्तस्पर्शनिवृत्तिरक्तरूपं नास्तीति प्रतीत्यनुपपत्तिः॥ तस्या ध्वंसादिवि

तर्कप्र० ५८

न प्र ८ मे ९

कृ

यत्वे रक्तसाविरक्तवतिरक्तघटेपि तदापत्तिरिति एकत्र ध्वंसप्रागभावयोरत्यंताभावविरोधेऽन्यत्रापि तयो
स्तत्सामानाधिकरण्ये बाधकाभावात् ॥ इत्थं चातीतेतसावि धूमवत्यपि धूमो नास्तीति प्रतीत्या धूमात्यंताभावस
त्वेनानुमितिरूपकार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकधर्मवत्वरूपकारणत्वसंभवान्न ज्ञायमानं लिंग
मनुमानमिति दिक् ॥ ननु धूमवति धूमात्यंताभावसत्वेपि अव्यवहितक्रियादीनां संयोगादिकं प्रति हेतुत्वोपपत्त
ये कारणत्वलक्षणे कार्याधिकरणवृत्त्यत्यंताभावेत्यत्र अभावे प्रतियोगिवैयधिकरण्यं वृत्तिमत्वं वा हेतुमत्ताय
हीविरोधितानियामकसंयोगसंबंधेनावश्यं विवक्षणीयं। एवं च धूमाधिकरणे धूमात्यंताभावसत्वेपि तस्य प्र
तियोगिवैयधिकरण्याभावाद्धूमवत्तायहविरोधितानियामकसंबंधेन वृत्तिमत्वाभावाच्च न तादृशत्वं किंतु अ
न्य एव तादृशोभावस्तत्प्रतियोगितानवच्छेदकत्वं धूमवत्वे क्षुण्णमेव। न च धूमानधिकरणकालावच्छेदेन धू
मात्यंताभावोपि प्रतियोगिव्यधिकरण एवेति वाच्यं। प्रतियोगिव्यधिकरणत्वं न प्रतियोग्यधिकरणावृत्तित्वं सा
मानाधिकरण्यस्याव्याप्यवृत्तित्वमानाभावात् ॥ किंतु प्रतियोग्यनधिकरणवृत्तित्वं अन्योन्याभावस्य व्याप्य
वृत्तितया प्रतियोग्यनधिकरणे न प्रतियोग्यधिकरणत्वसंभवः ॥ अन्यथा अन्याक्षिप्यप्यवृत्तित्वसंग्रहवाद
वस्थ्यं इति धूमात्यंताभावस्य प्रतियोगिव्यधिकरणत्वाभावात् ॥ न चैवं रासभसंयोगादीनामपि कारणत्वापत्तिः।
तदुक्तरीत्या तस्यापि प्रतियोगिवैयधिकरण्याभावादिति वाच्यं ॥ अनन्यथासिद्धपदेनैव तद्वारणात् ॥ न
वरासभादीनामपि तेनैव वारणे कारणतालक्षणे नियतपदं व्यर्थमिति वाच्यं ॥ स्वपक्षेन्वयमेव तावद्धित्ता।

न

च

अनु० ५८
५८

118

चय॥ ननु रासभसंयोगादिवल्लिंगस्यापि अन्यथासिद्धत्वमिति वाच्यं॥ अन्यथासिद्धेरेकस्याभिर्वक्तुमशक्यतया
तद्व्यक्तित्वेदकृत्स्यो निवेशनीयतया गौरवेण धर्मव्यक्तिभेदानिवेशात्॥ विशिष्टकारणताया ग्राहकप्रमाणमसति बाध
पा२ के विशेषणस्यापि कारणत्वं गृह्णातीति नियमस्य साधकस्य सत्त्वाच्च॥ अन्यथा इंद्रियसंयोगादिना हेतुत्वेद्रि
यस्यापि हेतुत्वोनुपपत्तेः॥ विषयितया लिंगविशिष्टज्ञानं करणं ज्ञानविशिष्टं लिंगं चेत्यत्र विनिगमनाविरहो
पि तद्धेतुतासाधकः॥ ननु परामृश्यमानलिंगस्यानुमितिसामान्यहेतुत्वे धूलीपटलादपि त्मामानुमित्यनुद
प्रमा६ यापत्तिरत्र लिंगाभावात्॥ न चैवमनुमितौ न हेतुः अनुमितिसामान्ये तु परामर्शो हेतुरिति वाच्यं॥ पक्षसामान्ये
पक्षसामान्यप्रयोजकं तद्विशेषेण विशेषस्यैवासति बाधकप्रयोजकत्वात्॥ परामर्शागमाचस्यैव अनुमितित्र
मात्रप्रयोजकत्वादित्यकेन॥ लिंगत्वेन तावद्व्याप्तिपक्षधर्मताबलं येन धूलीपटलत्वेनन्न स्यात्॥ किंतु
तद्धेतुत्वं तस्य च तत्रापि पक्षतत्वादिति न किंचिदेतत् इत्याचार्यमतमखंडितमेवेति॥ मैवं॥ कार्याधि
करणत्वं तिर्यास्य प्रतियोग्यधिकरणतानवच्छेदककार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणत्व
स्य साव प्रतियोगितानवच्छेदकधर्मकत्वे सति कार्याधिकरणे कार्याधिकरणसत्त्वस्यैव कारणपदार्थ
त्वात्तस्य चातीतानागतलिंगे सत्त्वादिति दिक्॥ नवीनास्तु॥ नहि वयं लिंगज्ञानत्वेन कारणतां ब्रूमो ये
नोक्तनियमावकाशो विनिगमनाविरहो वा भवेत्॥ किंतु ज्ञानत्वेनैव विशिष्टलिंगस्य हेतुत्वं व्याप्ति
प्रकारकपक्षधर्मताज्ञानरूपपरामर्शात्मकविशेषसामग्रीविरहाच्च न यत्किंचिज्ज्ञानादनुमित्यापत्तिः

नतुर

तर्कं प्र० ५७

नन्द्र२

अनु० ५६

रित्याकृः।। ननुपत्रविशेष्येविशेषणमितिन्यायेनपरामर्शादनुमितिस्तत्रव्याप्तिज्ञानस्यपरामर्शद्वाराकारणत्वा
संत्वेवइत्यतआह।।साध्यज्ञानंचेति।।साध्यत्वंसिद्धकर्मत्वादिरूपतयागुरुतरमतआह।।लिंगज्ञानंचेति।।लिं
गनिवेशोगौरवमतआह।।जन्यज्ञानंचेति।।जन्यपदंनित्यस्यफलस्वरूपयोग्यस्यफलावश्यंस्तावदितिमतमभिप्रेत्य
तदनंगीकारेतुनोपादेयमेवननु।।अतिप्रसंगइति।।परामर्शान्यूनकालीनपटज्ञानादनुमितिप्रसंगइत्यर्थः।।
व्यापारेणपरामर्शरूपव्यापारेण।।तन्निरासात्।।अतिप्रसंगनिरासात्।।नचैवंपटज्ञानेपिपर्वतोवह्निमानित्य
नुमितिजनकत्वापत्तिः।।इष्टत्वात्।।कार्यत्वेनज्ञानत्वेनकार्यकारणभावात्।।भवन्मतेपितज्जनकत्वव्यवहा
रस्यांगीकृतत्वात्।।नचानुमितित्वावच्छिन्नजनकत्वव्यवहारोनतन्मतइतिचेत्तावताक्षतेरभावादिति।।न
न्वेतावतापरामर्शस्यव्यापारद्वाराज्ञानमनुमितिकारणमितिसिद्धं।।तथाचयत्रवह्निव्याप्यधूमवानितिस्मरणा
त्मकपरामर्शस्तत्रानुमितिर्नस्यात्परामर्शव्यापारकस्यज्ञानस्यतत्राभावादित्यतआह।।ज्ञानपदमिति।।
सविषयकेति।।तथाचसविषयकत्वेनैवानुमितिकारणत्वेसंस्कारस्यैवस्मरणात्मकपरामर्शद्वाराकारणत्वा
संभवात्नानुपपत्तिरितिभावः।।ननुसविषयकत्वस्यैकज्ञानत्वापेक्षयागुरुत्वेनज्ञानत्वमेवजनकतावच्छे
दकंनचोक्तानुपपत्तिः।।तत्रापिस्वजन्यसंस्कारजन्यस्मरणरूपपरामर्शस्यैवव्यापारवत्वादित्यभिप्रेत्या
हात्स्वानुभवएवेति।।इयतासंबंधेनानुमानस्वरूपंनिरूप्यतद्विभागमाह।।तच्चेति।।अनुमानंअनुमिति
करणं।।ननुकेवलान्वयित्वंअत्यंताभावाप्रतियोगित्वंवापंचरूपंवाच्यंज्ञेयत्वादित्यत्रोपपत्तावपिइदंवाच्यं

ञे३ यि३

घत्वादित्यादेरनुयायत्वप्रसंगइत्यतः पारिभाषिकं केवलान्वयिपदार्थमाह। तत्रेति। तेषुमध्येइत्यर्थः। केवलान्वयिसाध्यकेति। केवलान्वयिसाध्यकविधेयकानुमितिजनकसंतत्वमित्यर्थः। इत्थंच इदंवाच्यंघटत्वादित्यत्रापि केवलान्वयिवाच्यत्वरूपसाध्यकत्वान्नासंग्रह इति भावः। साध्यविशेषणीभूतकेवलान्वयित्वं निर्वक्ति। तत्रेति। अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वमित्यर्थः। न चैवमाकाशाभावादीनां केवलान्वयित्वानुपपत्तिः। आकाशरूपाभावप्रतियोगित्वादिति चेन्न। वृत्तिमदत्यंताभावाप्रतियोगित्वस्य विवक्षितत्वात्। आकाशस्य नवृत्तिमदत्यंताभाव इति न दोषइति। केचित्तु घटाभावोनास्तीति प्रतीत्याघटाभावाभावसिद्धावपि आकाशाभावोनास्तीति प्रतीतिरभावाभावाकाशाभावाभावोनमानं। प्रतियोगित्वंच स्वरूपसंबंधविशेषएवनचा

क्र भावविरहस्यकत्वमिति नाकाशेआकाशाभावप्रतियोगित्वानुपपत्तिः। एवंच वृत्तिमद्विशेषणानुपादानेपि नक्षतिरित्याहुः। वस्तुतस्तु। अन्योन्याभावप्रतियोगितानवच्छेदकत्वं तु संयोगाभावादीनां केवलान्वयित्वोपपत्तये प्रतियोगिवैयधिकरण्यमत्रनिवेशनीयं। प्रतियोगिवैयधिकरण्यंचात्रप्रतियोग्यनधिकरणवृत्तित्वं न तु प्रतियोग्यधिकरणावृत्तित्वं। तथासत्यधिकरणभेदेनाभावभेदा[illegible]भावात्संयोगाभावस्य संगाधिकरणावृत्तित्वाभावेन तादृशाभावाप्रतियोगित्वात्संयोगस्य केवलान्वयित्वापत्तेः। तथाविवक्षितेतु संयोगानधिकरणवृत्तित्वविशिष्टसंयोगाभावाप्रतियोगित्वात्तावान्नोक्ता[illegible]नुपपत्तिः। इत्थंच आकाशरूपाभावस्यानिरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वोपपत्तेर्वृत्तिमत्त्वमत्यंताभावेनदेयमेव। नन्वेवमाकाशाभावस्यप्रतियोगिवैयधिकरण्याप्रसिद्ध्या तादृशाभावाप्रतियोगिन्याका[illegible]

का तरा४ ण५

५।३ इत्यंचयत्नितिमत्त्वंअसंतामावेवनदेयंभेदा।अकाशास्यनिरूत्प्रतियोगिवैय्य+ प्रतियोगि ७
धिकरण्यामावेनेवाकाशाभावस्यकेवलान्वयित्वोपपत्तेः।+५

तर्क०प्र०५८

अनुमान ५८

तिव्याप्तिरितिवाच्यं।।यादृशप्रतियोगितावच्छेदकसंबंधसामान्येयत्प्रतियोगिकत्वयादृशाभावाधिकरणानुयोगिक
त्वोभयाभावसादृशप्रतियोगितायाः शून्यत्वस्यविवक्षितत्वात्।।तस्यचआकाशाभावसाधारणत्वात्।।वृत्तिनि
यामकसंयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकएवाकाशाभावः केवलान्वयी।।तथाचवृत्ति
नियामकसंयोगेआकाशप्रतियोगिताभावेनोभयाभावसत्वात्सोऽपिप्रतियोगिव्यधिकरणएवेतिनातिव्याप्ति
रिति।।अन्योन्याभावप्रतियोगितानवच्छेदकत्वे सतिवृत्तिमत्त्वंवातत्त्वमितिदिक्।।तत्स्पष्टंदर्शयति।।यथेति।।नन्व
भिधाविषयत्वमभिधेयत्वं अभिधायआस्माच्छब्दादयमर्थोबोद्धव्य इत्याकारकेच्छा साचास्माकिनेवसाचाअ
कानयावादिच्छाविषयत्वं यत्किंचित्तादृशेच्छाविषयत्वंवानाद्यः।।यावदिच्छाविषयत्वस्यकुत्राप्यसत्वात्।।नांत्यः।
अस्मदीयपर्यंतकिंचिदिच्छाविषयत्वस्यसर्वत्रासत्वात् इत्यतआह।।अभिधेयत्वमिति।।भगवदिच्छायाःसर्वविष
यवत्वेनतद्विषयत्वस्यसर्वत्रसत्वादितिभावः।।एतदेवोपपादयति।।तच्चेति।।तादृशेच्छेति विषयत्वंचेत्यर्थः।।अभिधे
यत्वस्यतादृशेच्छारूपशब्दशक्तिशैब्दरूपत्वेविषयतासंबंधेनस्वस्यनियामकतयाऽऽहाभिधेयत्वमित्यभिधे
पत्वावगाहिप्रतीत्यनुपपत्तेः।।तादृशशब्दशक्तिविषयत्वरूपमेवतस्याभिधेयत्वमिति ध्येयं।।ननुसामान्यतस्तत्पदं
जन्यत्वप्रकारकपटबोधविशेष्यकेच्छाविषयत्वाधिकमेवतत्वं।।कृतबोधविषयकेच्छाविषयत्वमेकोधर्मोनास्त्येवस
र्वसाधारणत्वस्याभावात्।।किंतुविशिष्यपटपदजन्यत्वप्रकारकपटबोधविशेष्यकेच्छाविषयत्वाभावादिक
मेवतत्वं।तच्चप्रसक्तंनकेवलान्वयीत्यतआह।।वस्तुपदेति।।तथावस्तुपदजन्यत्वप्रकारकवस्तुबोधविशेष्यकेच्छा
विषयत्वस्यसर्वसाधारणंसंभवत्येवेतिनोक्तानुपपत्तिरित्यर्थः।।भगवज्ज्ञानविषयत्वादिति।।प्रमेयत्वसामान्यलक्षणा

व्दरा८

धेय

अस्मात्सानिज्ञान्यास्मदादिज्ञानविषयत्वस्यापि केवलान्वयित्वे केवलान्वयित्वमित्यपि बोध्यं॥ अनुमितिं प्रति साध्यसं
देहरूपपक्षतायाः कारणताक्लृप्तौ न्वयिस्थले साध्यसंदेहाभावेनानुमितिरेवमप्यस्याभावान्नेदमनुमानमिति मी
मांसकमतं दर्शयति॥ अत्र केचिदिति॥ पक्षतायाः हेतुत्वे युक्तिमाह॥ यत्रेति॥ साध्यवत्त्वेनेति॥ संदिग्धसाध्य
धर्मवत्त्वं पक्षत्वमिति प्राचीनलक्षणस्य यदि संदेहस्य विषयीकृतसाध्यवत्त्वमित्यर्थः॥ तदा तत्तान्नाम
तसाध्यकानुमितेरुच्छेद इति साध्यप्रकारकसंदेहविषयत्वमेव पक्षत्वमिति भावः॥ अतः कथमिति॥ तथाच
नपूर्वोक्तविभाग इति भावः॥ सिसाधयिषेति॥ अत्र साध्यनिश्चयस्य सिसाधयिषाविरहेण वैशिष्ट्यमे
ककालावच्छेदेनैकत्रभवन्तित्वं अतो न भिन्नकालीनपुरुषांतरीयसिसाधयिषाविरहसत्वेपि सिसाधयि
षाधीनानुमित्यनुपपत्तिः॥ केवलान्वयिनि पक्षतामुपपादयति॥ सावेति॥ इहापि केवलान्वयिसाध्यकस्य
लेपि संशय इत्यनंतरं पक्षतेति शेषः॥ संशयं विनेति॥ घनगर्जितेन मेघानुमानस्यपत्र ईश्वरादि॥ यत्रवासं
शयोस्तित्वत्रापि लिंगदर्शनव्याप्तिस्मरणादिना तन्नाशान्न तस्यानुमित्यव्यवहितपूर्ववर्तित्वमिति भा
वः॥ ननु साध्यनिश्चयेऽनुमित्यनुत्पत्त्या साध्यनिश्चयाभावस्यैव पक्षतात्वमस्तु कृतं विशिष्टांतेनेत्य
त आह॥ साध्येनेति॥ विशिष्टांतमिति॥ सिसाधयिषाविरहविशिष्टत्वं साध्यनिश्चयविशेषण
मित्यर्थः॥ विवक्षितेतनदोष इत्याह॥ नचेति॥ विशेषणाभावप्रयुक्तविशिष्टाभावस्याप्यसत्वेपीति
भावः॥ सिसाधयिषाविरहाभावस्य सिसाधयिषायाएव पक्षतात्वे सिसाधयिषाशून्यकालेऽसति

123

न्साध्यनिश्चयेऽनुमित्युत्पत्त्यापत्त्या विशेष्यविशेषणविशिष्टाभावस्यैव पक्षतात्वमवसेयं॥ न तु पर्व
तोद्देश्यकवह्निविधेयकानुमितिं प्रति सिसाधयिषाविरहविशिष्टवह्निप्रकारकपर्वतविशेष्यकनिश्चय नि२
त्वावच्छिन्नाभावरूपपक्षताया हेतुत्वे पाषाणमयो वह्निमान् पर्वतस्तेजस्वीत्यादिवह्निप्रकारकपर्व
तविशेष्यकनिश्चयसत्त्वे पर्वतो वह्निमानित्यनुपपत्तिः॥ एवं पर्वतो वह्निमानिति सिद्धिसत्त्वे द्रव्यं वह्नि
मत्पर्वतो द्रव्यवानित्यनुदयापत्तिरत आह॥ संक्षेप इति॥ तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरू
पितवह्नित्वावच्छिन्नविधेयताशालिसंयोगसंसर्गकानुमितिं प्रति पर्वतोद्देश्यकवह्निविधेयका
नुमितिगोचरेच्छाविरहविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतानि
रूपितसंयोगनिष्ठसांसर्गिकविषयताशालिनिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वान्न काप्यनुप
पत्तिरिति भावः॥ अत्र च घटानुमितीच्छासत्त्वे पर्वतो वह्निमानित्यनुमितिवारणाय पर्वतोद्देश्यकव
ह्निविधेयकानुमितिगोचरेच्छात्वेनेच्छाया निवेशः॥ अनुमितिर्जायतामित्याद्यनुगतेच्छानां तद्घ च्छा ५
न्वितेन पर्वतो वह्निमनुमिनुयामित्याद्यनुगतेच्छानां तु पर्वतोद्देश्यकप्रकारतानिरूपितवह्निविधेय
कत्वप्रकारतानुमितिगोचरेच्छात्वेनोत्तेजकत्वं बोध्यं॥ न तु सर्वसाधारणपर्वतोद्देश्यकवह्निवि
धेयकानुमितिगोचरेच्छात्वेन तथा सति घटानुमितिसामग्रीसत्त्वे पर्वतो वह्निमानिति सिद्धिस
त्त्वेऽनुमितिर्जायतामितीच्छासत्त्वे पर्वतो वह्न्यनुमित्यापत्तेः॥ सिद्ध्यप्रतिब[illegible]तपरानुमित्सुत्त्सत्त्वापरिच्छा
ध्यौ०

याविषयसिद्ध्याद्युत्थापनेरयोगात्॥ नासां तत्तद्व्यक्तित्वेनोत्तेजकत्वेऽन्यानुमितिसामग्र्यसमवधानका
लीनानामेवतथाविधेच्छानामनुत्तेजकतयाघटानुमितिसामग्रीकालीनायास्तस्या अनुत्तेजकत्वात्।
अनुगतेच्छानां तु बाधकाभावात् पूर्वोक्तानुगतरूपेणैवोत्तेजकत्वमिति॥ ननु धूमपरामर्शसत्त्वे पर्वते
वह्निमानिति सिद्धिसत्त्वे सत्यां चालोके[illegible]न वह्निमनुमिनुयामितीच्छायां पर्वतो वह्निमानित्यनुमित्यापत्ति
क्.५ रिति चेन्न॥ धूमलिंगकानुमितिं प्रति धूमलिंगकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वात्। एवमा
ति ६ लोकादिस्थलेऽपितकुकंदाधिकारेण लिंगविशेषेणापि च नियंत्रितं पक्षत्वमिति। अथ वह्निव्याप्यधूम
वान्पर्वतः वह्निव्याप्यालोकवान्पर्वत इति समूहालंबनात्मकपरामर्शकाले सिद्धिसत्त्वे आलोकेन वह्निमनु
मिनुयामितीच्छाकाले आलोकलिंगकानुमित्युत्पत्त्या तस्याश्च धूमपरामर्शजन्यत्वेन धूमलिंगकत्वात्पू
र्वं धूमलिंगकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावरूपकारणाभावाद्व्यभिचार इति। आलोकपराम
अ६ र्शविशिष्टआलोकलिंगकेच्छायामपि[illegible]तु उत्तेजकत्वमावश्यकं॥ एवं रूपलिंगकपरामर्शविशिष्टरूप
५(एवं लिंगकेच्छायामपि एवं च धूमलिंगकेच्छायामपि धूमपरामर्शविशिष्टाया एव लाघवेनोत्तेजकत्वेन एकरू
चानुमितिपक्षतयोः कार्यकारणभाव इति लिंगभेदेन पक्षतायाः कारणत्वे मानाभाव इति चेन्न॥ स्व
भ.५ व्यवहितोत्तरक्षणोत्पन्नत्वसंबंधेन धूमलिंगकेच्छा[illegible]विरहविशिष्टसिद्ध्यभावस्य हेतुत्वोपगमात्
उक्तसमूहालंबनस्थले च धूमलिंगकेच्छाविशिष्टसिद्धिविशिष्टानुमितेरुत्पत्त्या व्यभिचारासंभवा
विर२ त्॥ नन्वोक्तस्थले धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावविनापि च यादृशसामग्रीबलाद्धूमलिं
३ + सिद्धिविशिष्टं यत्तदन्यानुमितिं प्रति धूमलिंगकेच्छाविरहविशिष्ट + २

तृ
अनुमितिकरणत्वात्तादृशसामग्रीबलाद्धूमलिंग ५

गकपरामर्शस्थलेऽपि सिद्धिसत्वेऽप्यनुमित्यापत्तिरिति वाच्यं॥ धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावघटितपराम
र्शोत्तरघटितसामग्र्या आलोकलिंगकेच्छाविरहविशिष्टसिद्ध्यभावघटितालोकपरामर्शोत्तरघटितसाम
+२ अन्यतरस्यै ग्र्याश्च तत्र नियामकत्वात्॥ अन्यथा तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेच्छानामुत्तेजकत्वे तावतो
दभावकूटस्यैव तत्र निवेशनीये तेषां विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात्॥ ननु पर्वतोद्देश्यक
वह्निविधेयकानुमितिं प्रति स्वीयव्याप्तिप्रकारकतानिरूपितविशेष्यतावच्छेदकीभूतधर्मवल्लिंगकत्व
प्रकारकत्वस्य सामानाधिकरण्योभयसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टायाः सिसाधयिषातो हि २६
विशिष्टसिद्ध्यभावत्वेन कारणत्वे एकरूपेणेच्छाया उत्तेजकत्वं न तु लिंगभेदेन समूहालंबनस्थले च आ
लोकपरामर्शविशिष्ट आलोकलिंगकेच्छाया एव तथात्वेन व्यभिचारावकाशादिति चेन्नैवं॥ न चापि
अनुमितिर्जायेत नामित्यननुगतेच्छानां तु अनुगमकरूपाभावेन तत्तदिच्छाभावकूटस्यैव एकत्र निवेश।
नायततया तेषां मिथो विशेष्यविशेषणभावे विनिगमनाविरहात्॥ अवच्छेदकताया व्यासज्यवृत्तित्वस्य
निरस्तत्वात्॥ तस्मात्तत्तल्लिंगपरामर्शकालीनत्वच इच्छाभावं निवेश्य तत्तल्लिंगभेदेन पक्षताया हेतु
त्वमेवोचितमिति दिक्॥ केवलव्यतिरेकिणं लक्षयति॥ असत्सपक्ष इति॥ सिद्ध्यसिद्धिव्याघातस्या
त्वं२ दाहः॥ वर्तते चेति॥ असत्सपक्षैर्नेत्यर्थः॥ पक्षातिरिक्त इति॥ अनिश्चितसाध्यसाधनसहचारकत्व
मितिस्वरूपकथनं न तु विवक्षितं तथा निवेशे वैयर्थ्यात्। किंतु अनिश्चितसाध्यकत्वं तत्त्वं॥ साध्य

नाधनयोरितरभेदपृथिवीत्वयोः॥ ननु तत्र साहचर्यसत्वेपि स्वमासन्न निश्चयसत्वात्मनानिश्चितसाध्यकत्वमत आ
धसा २ ह॥ निश्चीयते चेति॥ सा[illegible]धनसहचारनिवेशप्रयोजनाभावेन तदनिवेश्यानिश्चितसाध्यकत्वमेवास्तु कृ
तं पक्षातिरिक्त इति विशेषणेनेति शंकते॥ न चेति॥ एवकारेण पक्षातिरिक्त इत्यस्य व्यवच्छेदः॥ उत्तरमिति॥
घटादावपीति॥ प्रसक्तत्वे चेति॥ घटो न जलादिरिति प्रतीतेः॥ न च परमाणुसंसर्गाभाववद्वृत्तीन्द्रियप्रतियोगि
कत्वेन कथमितरभेदः प्रत्यक्षः योग्यानुपलब्धिविरहात्॥ स्तंभे पिशाचान्योन्याभावो न प्रत्यक्षः॥ किंतु वा
युर्वर्तीतिवत्तस्य लिंगग्रहोपलक्षणत्वादिति वाच्यं॥ तार्किकं तं प्रत्यक्षमनुपलब्धिविरोधितदभावस्यैव योग्य[illegible]
तीं त्वात्॥ न त्वैन्द्रियग्रहीतयोरभिक्तत्वं॥ अन्यथा जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः॥ एवं च पिशाचभेदस्येवेतरभे
दस्यापि प्रसक्तत्वोपपत्तिः॥ निश्चितत्वादिति॥ ननूपादाने च घटस्य प्रत्यक्षत्वात् तत्र निश्चयेपि पक्षा[illegible]तिरिक्ते स
निश्चितसाध्यकत्वमस्त्येवेति भावः॥ पक्षतावच्छेदकावच्छिन्नातिरिक्तत्वं चात्र पक्षातिरिक्तत्वं बोध्यं॥ नातो घ
टादेरपि यत्किंचिद्घटातिरिक्तत्वादुक्तदोषः॥ अन्यथेति॥ घटादावितरभेदानिश्चयस्येत्यर्थः॥ न घटितेति॥
साध्यघटितेत्यर्थः॥ विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया साध्यज्ञानं विना साध्यघटितव्याप्तिज्ञा
नासंभवादिति भावः॥ साध्यनिश्चये॥ इतरभेदनिश्चये॥ तस्या घटस्यापक्षत्वमिति॥ सिद्ध्यभावत्वादि
रूपं पक्षत्वमित्यर्थः॥ घटे इतरभेदनिश्चयेनेतरभेदनिश्चयाभावरूपपक्षताभावात्कथं पृथिवीसामा ल २
न्यस्य पक्षत्वमिति भावः॥ पृथिवीत्वेनेति॥ पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन साध्य

127

सिद्धेरिवाप्रतिबंधकतया प्रकृते पृथिवीत्वसामानाधिकरण्येन घटादाविपरभेदनिश्चयेपि पृथिवीत्वावच्छेदेना
नुमितौ न क्षतिरिति भावः ॥ न चैवमंशतः सिद्धसाधनस्यैव दूषकत्वविलोपप्रसंग इति वाच्यं ॥ पक्षतावच्छेद
कैक्ये तद्दूषकस्येष्टत्वात् ॥ पक्षतावच्छेदकनानात्वे एव तद्दूषकत्वांगीकारात् ॥ यथा वाङ्मनसी नित्ये मूर्त्तत्वा अ२
दित्यत्रानित्यत्ववाग्मिति बुद्धेरुद्देश्यया सिद्ध्या नोभयधर्मावच्छेदेनानित्यत्वानुपपत्तिरिति ॥ तदवच्छेदेन पृथिवीत्वा
वच्छेदेन ॥ पक्षतेति ॥ इतरभेदनिश्चयाभावरूपपक्षताविरोधित्वादित्यर्थः ॥ विरोधित्वं च सहानवस्थानरू न५
पं बोध्यं ॥ इह घटे सः पृथिवीत्वावच्छेदेनेतरभेदनिश्चयः ॥ सर्वत्रेति ॥ परमाण्वादिरूपपृथिव्यामित्यर्थः ॥
ननिश्चयेति ॥ इतरभेदनिश्चयाभावादित्यर्थः ॥ परमाण्वादेरयोग्यतया गृहस्य क्षोणतत्र तस्य निश्चेतुमशक्य
त्वात् ॥ तथा च पृथिवीत्वसामानाधिकरण्येन निश्चयसत्वेपि ऽवच्छेदकावच्छेदेन निश्चयाभावात् ॥ घटादेः प
क्षत्वमव्याहतमिति भावः ॥ इदं च घटादौ पृथिवीत्वेनेतरभेदनिश्चयमभिप्रेत्य वस्तुतस्तु घटत्वेनैव तत्रेतर
भेदनिश्चये न पृथिवीत्वेनेतरभेदानिश्चयात् ॥ पृथिवीत्वधर्मितावच्छेदकानुमितौ तद्धर्मितावच्छेदकका
नुमितौ वा बाधकाभावात् तद्धर्मितावच्छेदकसिद्धेरिवाप्रतिबंधकत्वादिति ध्येयं ॥ अन्वयीति ॥ व्यतिरेक
योः साध्याभावहेत्वभावयोः सहचारात् ॥ उक्तेति ॥ अन्वयव्याप्तिगर्भितेत्यर्थः ॥ लाघवेनानुमितिसामान्ये
अन्वयव्याप्तिज्ञानस्यैव हेतुत्वादिति भावः ॥ नन्वेवमितरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथि
वीति परामर्शादितरभेदज्ञानशून्यकाले पृथिव्यामितरभेदविधेयकानुमितेरुच्छेदः ॥ एवं स्वातंत्र्येण

128

तुतया साध्याभावहेत्वभावयोः सामानाधिकरण्यस्यान्वयव्याप्त्यघटकतया विरोधात्॥ २

अनुमादे २   अ १

इतरभेदज्ञानसत्वेनादृशपरामर्शस्य पृथिवीतरभेदवतीत्यनुमितेरप्युदयप्रसंग इति वाच्यं॥ अन्वयव्याप्तिज्ञानस्यैव
अनुमितिहेतुत्ववादिनामाचार्यदीक्षितानां [illegible] प्रापत्तेः॥ प्राचद्धस्यनेनास्यत्वात्॥ स च विशेषणज्ञा
नविधया सहचारज्ञानस्यान्वयव्याप्तिग्रहहेतुत्वात्तावेन तद्ज्ञानस्य कथं तादृशव्याप्तिग्रहहेतुत्वमिति॥ न च व्य
भिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयसहचारज्ञानयोरपि हेतुत्वमिति वाच्यं॥ आद्यस्य साध्यानवगाहित
यात्व्यतिरेकसहचारज्ञानस्य व्यभिचारज्ञानविरोधित्वाभावात्॥ अत्र केचित्॥ प्राचीनमते अन्वयव्याप्ति
ज्ञाने भिन्नधर्मितत्वेपि व्यतिरेकसहचारज्ञानस्यान्वयव्यतिरेकाभ्यां यथा हेतुत्वं अन्वयव्याप्तिज्ञानमे
व चानुमितिसामान्ये हेतुरित्युपेयते तथान्वयसहचारज्ञानं व्यतिरेकव्याप्तिज्ञाने हेतुः तज्ज्ञानमेव चानुमि
तिसामान्ये हेतुरित्युच्यतां विनिगमकत्वाभावात्॥ न चैवमन्वयव्याप्त्यवगाहिवह्निव्याप्यधूमवतापराम
र्शादनुमितेरनुपपत्तिरिति वाच्यं॥ जलत्वादितरभेदाभावव्यापकीभूताभावप्रतियोगिमत्पार्थिवीत्ववती पृथि
वीति व्यतिरेकव्याप्त्यवगाहिपरामर्शादनुमित्यनुदये इष्टापत्तेरिव ममापि तत्र तदनुत्पादस्येष्टत्वादिति तन्न॥
अन्वयव्याप्तिज्ञानस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात्॥ तथाहि॥ व्यतिरेकव्याप्तिः साध्यनिष्ठाध्य
मेतद्ज्ञानस्य स्वाश्रयव्यापकीभूताभावप्रतियोगित्वसंबंधेन स्वनिरूपकाभावप्रतियोगितासंबंधेन तयार्थ
हपागुरुत्वसंबंधेन व्याप्तिविशिष्टधूमवत्तावगाहिपरामर्शत्वेन हेतुत्वे गौरवात्॥ सामानाधिकरण्यरूपा दिर
न्वयव्याप्तिज्ञानस्यानुमितिहेतुत्वे तु स्वरूपसंबंधेन वह्निनिरूपितव्याप्तिविशिष्टहेतुमत्तानिश्चयस्यैव तद्ध

तर्क०प्र० ६२

अनुमान ६२

मितिलाघवं॥ किंचैवं साध्याभावाप्रसिद्ध्या व्यतिरेकव्याप्तिज्ञानासंभवेन केवलान्वय्यनुमानोच्छेदप्रसंग इति दिक्॥
अन्वयव्याप्तिज्ञानमिव व्यतिरेकव्याप्तिज्ञानमप्यनुमितिहेतुः॥ न चैवं केवलान्वय्यनुमित्यनुरोधेनावश्यक्लृप्तहेतुत्वावे
नान्वयिव्याप्तिज्ञानेनैवोपपत्तौ तस्य पृथक्कारणत्वकल्पने गौरवमिति वाच्यं॥ इतरभेदज्ञानमन्यकाले ह्यितरव्यापकी
भूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शादितरभेदविशेष्यकानुमितेः स्वातंत्र्येणेतरभेदज्ञानसत्त्वे
तादृशपरामर्शादितरभेदविशेष्यकानुमितिस्वरूपलापप्रसंगेन हेतुत्वस्यावश्यकत्वात्॥ प्रामाणिकगौरवस्यादो
षत्वात्॥ न चैवं परस्परव्यतिरेकेपि परस्परेण कार्योत्पादनपरस्परजन्यानुमितौ तयोर्व्यभिचार इति वाच्यं॥ एवमन्
तेऽन्वयसहचारज्ञानव्यतिरेकसहचारज्ञानयोरन्वयव्याप्तिज्ञानहेतुत्वे तत्र व्यभिचारवारणाय व्यवहितोत्तर
त्वस्य निवेशनीयत्वादिति अन्वयव्यतिरेकाभ्यामुभयविधव्याप्तिज्ञानस्यानुमितिहेतुत्वमिति मणिकारमतमा
दर्शयति॥ साध्याभावेत्यादिना॥ अनुमितिः साध्यविधेयकानुमितिः॥ ननु हेत्वभावनिरूपितसाध्याभावनि
ष्ठव्याप्तिज्ञानं हेत्वभावविधेयकानुमितिं जनयतु न तु साध्यविधेयकानुमितिं अनुमितौ व्यापकतावच्छेदकरूपे क० ६
णव्यापकस्यैव भाननियमात्॥ अन्यथा वह्निव्याप्तिज्ञानात् घटानुमित्यापत्तिरित्याशंकते॥ नचेति॥ अन्यव्या
प्तिग्रहात्॥ अन्यनिरूपितव्याप्तिज्ञानात्॥ हेत्वभावनिरूपितव्याप्तिज्ञानादिति यावत्॥ अन्यानुमितिः साध्य
विधेयकानुमितिः॥ ननु अन्यव्याप्तिज्ञानस्यान्यविधेयकानुमितिजनकत्वे बाधकाभाव इत्यत आह॥ अति
प्रसंगादिति॥ घटनिरूपितव्याप्तिज्ञानात् पटविधेयकानुमितिप्रसंगादित्यर्थः॥ पदार्थमिति॥ स्वाश्रयव्या
पकीभूताभावप्रतियोगित्वसंबंधेन साध्याभावनिष्ठव्याप्तिविशिष्टहेतुमत्तावगाहिनिश्चय इत्यर्थः॥ सोनुमापध्या० २

५+ निवेश इवमन्नतेपि परस्परजन्यानुमितौ व्यभिचारवारणाय व्यवहितोत्तरत्व [illegible] +८

कत्वादिति ॥ साध्यविधेयकानुमितिविशेषे हेतुरित्यर्थः ॥ व्यतिरेकव्याप्त्यवगाहिपरामर्शाव्यवहितोत्तरानुमितिजनकमि
तिपावत् ॥ व्यापकतावच्छेदकरूपेण व्यापकस्य भानमिति नियमस्तु अन्वयव्याप्त्यवगाहिपरामर्शजन्यानुमिति
स्थल एवेति द्रष्टव्यं ॥ ननु घटादौ वितरभेदस्य निश्चितत्वेन पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् घटवदित्यन्वय्येव ।
न तु व्यतिरेकी ॥ निश्चितसाध्यकत्वमेव दृष्टान्तत्वे प्रयोजकत्वेन तु पक्षान्यत्वमपीति चेन्न ॥ अन्वयसहचारग्रहदशा
यां व्यतिरेकसहचारेण व्याप्तिग्रहोदयात् ॥ न तु कमाचार्यैः ॥ आस्तां तावदयं सुहृदुपदेशः ॥ केवलव्यतिरेकि
लक्षणं तावत्सिद्धमिति ॥ अन्वयव्यतिरेकिणं लक्षयति ॥ उभयान्य इति ॥ केवलान्वयि केवलव्यतिरेक्यन्यदित्य
र्थः ॥ असिद्धानुमानमिति ॥ न वह्निमान् धूमादित्यर्थः ॥ किं तु ॥ अन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं
व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वमेव केवलव्यतिरेकित्वं ॥ उभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वे
ऽविरोधे धर्मस्यापि केवलान्वयित्व केवलव्यतिरेकित्वे इष्ट एव ॥ न चैवं विभागव्याघातः ॥ उपधेयसंकरेऽप्युपाधेरसं

स्ना

ग्रहादिति ॥ अत एवाह संक्षेप इतीत्याहुः ॥ ननु इदं ज्ञायमानलिंगस्यानुमानत्ववादिनये उपपद्यते न तु लिंगज्ञानस्या
नुमानत्वनये ॥ अत एवानुपदमेव ॥ एवं हेतावभिहितेऽ इति वक्ष्यतीति चेन्न ॥ तच्चानुमानं त्रिविधमित्यस्य अनुमिति
जनकलिंगज्ञानविषयीभूतलिंगं त्रिविधमित्यर्थः ॥ न चानुमितिकरणस्यैव विभागौचित्यात् लिंगस्य त्रिविधत्वा
भिधानमसंगतमिति वाच्यं ॥ केवलान्वयिसाध्यकानुमितिजनकत्वमेव केवलव्यतिरेकिलिंगकानुमितिजनकत्वमन्व
न्वयव्यतिरेक्युभयलिंगकानुमितिजनकत्वभेदेन लिंगज्ञानस्य त्रिविधत्वेन लिंगस्यापि त्रैविध्यसंभवात्
वस्तुतो लिंगज्ञानस्यैव त्रैविध्यं लिंगधर्मस्य तु तद्विषयत्वेन तत् ॥ केवलान्वयिसाध्यकानुमानमित्यस्य च केव
लान्वयिसाध्यकानुमितिजनकज्ञानविषय इत्यर्थः ॥ एवं पक्षातिरिक्तेऽनिश्चितसाध्यकत्वमित्यस्यापि पक्षातिरिक्तेऽ

क्रिप

131

न॰दी॰प्र॰ ६२

श्री ३

अनुमान ६२

निश्चितसाध्यकानुमितिजनकज्ञानविषयत्वमर्थः ॥ एवं पक्षातिरिक्तेऽनिश्चितसाध्यकत्वमित्यस्य पक्षातिरिक्तेऽज्ञ
यान्यत्वस्य च केवलान्वयिकेवलव्यतिरेकिसाध्यभिन्नसाध्यकविधेयकानुमितिजनकज्ञानविषयत्वमर्थः ॥ एवं दे
तावभिहितत्वस्य नादृशज्ञानविषयीभूतो हेतावसिद्ध इत्यर्थ इति न शंकापंककलंकलेशोऽपीति ॥ तत्र निर्णयावि
जयरूपैककार्यकारित्वात् प्रसंगाच्च हेत्वाभासान्निरूपयति ॥ एवमिति ॥ तदाभासाः हेत्वाभासाः ॥ हेतुवदाभा
सन्त इति योगात् धर्म्येव हेत्वाभासपदवाच्यमिति ध्येयं ॥ अनुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषय
त्वं हेत्वाभासत्वं ॥ बाधतद्वत्ताव्याप्यवत्तादीनां ज्ञानादीनां साक्षादेवानुमितिप्रतिबंधकत्वाद्बाधसत्प्रतिपक्षयो ७४
र्लक्षणसमन्वयः ॥ व्यभिचारज्ञानादीनां अनुमितिकरणव्याप्तिज्ञानादिप्रतिबंधकत्वेन तद्विषयत्वेन व्यभिचारादे
स र्हेत्वाभासत्वोपपत्तेः ॥ अत एव व्यभिचारसंग्रहायानुमितिप्रतिबंधकत्वं विहायानुमितितत्करणान्यतरेत्युक्तं ॥ न च लब्धे
नौरवास्तु किं तेनेति न्यायेन व्यभिचारज्ञानस्यानुमितिप्रतिबंधकत्वमेवास्त्विति वाच्यं ॥ धूमपरामर्शका
लेऽप्यालोको वह्निव्यभिचारीति वह्निव्यभिचारिज्ञानकालेऽनुमित्यनुदयप्रसंगात् ॥ न च तद्धर्मावच्छिन्नलिंग
कानुमितौ तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानस्यैव प्रतिबंधकत्वमिति वाच्यं ॥ गौरवात् ॥ साक्षादविरो
धिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव विरोधित्वाच्च ॥ न चैवं धूमोयं वह्निव्याप्य इति ज्ञानकाले भिन्ने ह्न्यादि
जन्यभिचारज्ञानकालेऽप्यनुमित्युदयापत्तिरिति वाच्यं ॥ इष्टत्वात् ॥ तदुक्तं करणे पूर्णे किन्न सिद्ध्येदिति ॥ व्यभि
चारादिभ्रमवारणायातिप्रसंगभंगाय यथार्थेति ॥ विभजते ॥ सव्येति ॥ तत्राद्यविधं सव्यभिचारं निरूपणीये ॥

132

साध्यवदन्येति। साध्याभाववद्वृत्तित्वमिति हृदे धूमाभाववदयोगोलकवृत्तित्वेन धूमवान्वह्नेरित्यादौ लक्षणासं
भवेपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभाववद्वृत्तित्वादि तद्वृक्षत्वस्यापि तत्वापत्तिः प्रतियोगिवैय्य
धिकरण्यादिनिवेशे चातिगौरवमिति तत्परित्यागः॥ अन्योन्याभावस्य च व्याप्यवृत्तित्वान्न दोषः॥ न च कपि
संयोगिघटोभयवद्द्रव्यवारणाय प्रतियोगिवैय्यधिकरण्यनिवेशावश्यकत्वमिति वाच्यं। साध्यतावच्छेदकावच्छि
न्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वस्याविवक्षितत्वात्॥ न हि कपिसंयोगत्वावच्छिन्नवदन्यत्व
स्यैतद्वृत्तेः सत्वमिति॥ यदि चान्योन्याभावस्याव्याप्यवृत्तित्वं विसाध्यते तथापि प्रतियोग्यवृत्तित्वस्यैव ला
घवेन निवेशनीयत्वात्॥ प्रतियोगिवैय्यधिकरण्यापेक्षया लाघवस्य स्फुटत्वात्। न च द्रव्यं गुणकर्मान्य
त्वविशिष्टसत्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेन सत्ताया द्रव्यभिन्नगुणादिवृत्तित्वादतिप्रसंग इति वाच्यं॥
धि णा ६ साध्यवदन्यनिष्ठाँकरैनाभिन्ननिरूपकतावच्छेदकहेतुतावच्छेदकावच्छिन्नस्य तदर्थत्वात्॥ अस्यैव लक्षणं
दि अ ५ योजयति॥ यथेत्यादिना। य[illegible]न्योन्याभावोप्यव्याप्यवृत्तिः तदा कपिसंयोगी एतद्वृक्षत्वादित्यत्राति
व्याप्तिः॥ प्रतियोग्यवृत्तित्वनिवेशे च गौरवमित्यत आह॥ साध्यासमानाधिकरणेति। साध्याधिकर[illegible]वृत्ति णा ४
त्वमत्र साध्यसामानाधिकरण्यं न तु साध्यानधिकरणावृत्तित्वं॥ अन्यथा वह्न्यनधिकरणवृत्तिद्रव्यत्वा
दि[illegible]सामानाधिकरण्यस्य धूमेऽपि सत्वेन वह्निमान्धूमादित्यादावतिप्रसंगापत्तेः॥ अत्र च साध्याधिकरणे ऽ
वृत्तित्वं येन संबंधेन तेन संबंधेन तदधिकरणत्वं विशेषणविशेषणवाऽवच्छित्वं तदधिकरणत्वं च बोध्यं॥

व्य २

ता १

एतेनयत्किंचित्संबंधेनावच्छिन्नोक्तौसंयोगादिनाऽवह्निपर्वतत्वसामानाधिकरण्यमादायधूमादावतिव्याप्तिः।
संबंधसामान्येनावच्छिन्नोक्तौधूमवदन्यत्वादेरपिकालिकादिसंबंधेनधूमवद्वृत्तितयातद्वद्भिन्नगग
नादेरेवतत्सामानाधिकरण्यंचवक्तव्यमसंभवादसंभवापत्तेरितिपरास्तं॥तत्सामानाधिकरण्यंचतदधिक
रणेहेतुतावच्छेदकसंबंधेनसंबंधित्वंनातःकालिकादिसंबंधमादायधूमादावतिव्याप्तिरिति।यद्यप्यसाधा
रणासाधारणमेवैतत्॥तथाप्युपधेयसंकरेऽप्युपाधेरसंकरादितिन्यायेनतत्साधारण्येऽपिनक्षतिविरहः।
असाधारणाद्यज्ञानेऽपितज्ज्ञानेऽनुमितिप्रबंधादिति।सपक्षविपक्षव्यावृत्तत्वमसाधारणत्वंनिश्चितसाध्य
वद्वृत्तित्वेसतिनिश्चितसाध्याभाववद्वृत्तित्वमिति शब्दोऽनित्यःशब्दत्वादित्यादौसर्वेभ्योनित्येभ्योऽनि
त्येभ्यश्चशब्दत्वस्यव्यावृत्तत्वात्लक्षणसमन्वयः॥नचशब्दोऽनित्यःशब्दत्वादितिसद्धेतौशब्देनित्यत्वानिश्च
यदशायांनिश्चितसाध्यवद्व्यावृत्तत्वादसाधारण्यापत्तिरिष्टत्वात्॥असाधारणसत्प्रतिपक्षयोरनित्यत्वदो
षवादिनांप्राचांमतेनैतल्लक्षणादितितन्मतंदूषयितुंस्वयंलक्षणमाह॥साध्येति॥ननुसपक्षव्यावृत्तत्वमसाधा
रणत्वमित्यकागतिरित्यतआह॥इदमेवेति॥पूर्वनिरुक्तार्थकमेव॥ननुनिश्चितसाध्यवद्व्यावृत्तत्वंतत्वेनशब्दोऽ
नित्यःशब्दत्वादित्यस्यसंग्रहःस्यादिति॥अव्याप्तिरिति॥अनित्येशब्देशब्दत्वस्यसत्वेनानित्यत्वव्यापका
भावप्रतियोगित्वस्यशब्दत्वेसत्वादितिभावः॥सद्धेतुत्वादिति॥ननुअसाधारणसत्प्रतिपक्षयोरनित्य
दोषत्ववादिप्राचीनमतेसद्धेतावपितत्संभवइतिचेन्न॥बाधभ्रमेऽनुमितिप्रतिबंधान्नानुमितिः॥नचहेतुस्तु

अ२ बाधस्या।प्यनित्यदोषत्वापत्तिः॥यदिचबाधबुध्याप्रतिबंधा१

नन्वुक्तमिति विलाप्यतेतदागच्छते यत्रासा[illegible]धारणसत्प्रतिपक्षस्थले नदत्ताकव्याप्यवत्ताज्ञानेनानुमितिं प्रतिप्रति
बंधः ननु तत्र हेतुरपि दुष्ट इत्यस्य फलतुल्यत्वादिति भावः ॥ एतज्ज्ञानं ॥ असाधारण[illegible]त्वज्ञानं ॥ साक्षात्व्याप्याभावा
वगाहित्वात् ॥ व्यतिरेकीति ॥ व्यतिरेकिव्याप्तिमत्सत्प्रतिपक्षरूपत्वात् ॥ तथा च तदभावव्याप्यवत्ताज्ञानमनु[illegible]
नुमितिविरोधित्वमिति भावः ॥ ननु साध्यव्याप्यवत्ताज्ञानं साध्याभाववत्ताज्ञानं चात्र संवत्तमिति सत्प्रतिपक्षा
दसेदप्रसंग इत्यत आह ॥ न चेवमिति ॥ एवं सत्प्रतिपक्षरूपत्वे सत्प्रतिपक्षत्वमिति ॥ तथा चैतस्य तदंतर्गतत्वेऽप
चैव हेत्वाभासा इति विभागव्याघात इति भावः ॥ हेत्विति ॥ साध्यव्याप्यहेतुसाध्याभावव्याप्यहेतोर्भेद एव
सत्प्रतिपक्षत्वं यथा ह्रदो वह्निमान् धूमात् ह्रदो वह्न्यभाववान् ह्रदत्वादित्यादौ प्रकृते चैकस्यैव शब्दत्वस्योभय
साधकत्वेन तस्योभयलिंगकत्वघटितं सत्प्रतिपक्षत्वमिति भावः ॥ अहद्वेति ॥ तथा च साध्यसाधनयोः स
हचारग्रहेणान्वयव्याप्तिग्रहेणान्वयित्वमिति भावः ॥ तथा चेति ॥ नित्यत्वाभावव्यापकीभूताभाव
प्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाहिनित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साध्यमिव अनित्यत्वाभावः ॥ नित्य
त्वं तथा च नित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाहि अनित्यत्वव्याप्यशब्दत्ववत्ताप
रामर्शात् साध्याभावोऽपि साधनीयः ॥ न च विरुद्धोऽयं साधनं संभवतीति परस्परानुमितिप्रतिबंधक एवेत्यर्थः ॥
विरुद्धयोः साध्यसाध्याभावयोः ॥ अनिर्णय इति ॥ अनुत्पत्तिरित्यर्थः ॥ अनिर्णय इत्यनेन सत्प्रतिपक्षस्य

तर्कि.प्र.६५

अनुमान ६५

लेसंशयाकारानुमित्यंगीकर्तृरत्नकोशकारमतमादर्शितं।।तदभावव्याप्यवत्ताज्ञानस्यापि विशिष्टबुद्धिसामान्य रस्य
हेतुविरोधितयासत्प्रतिपक्षस्थलेन संशयाकारानुमितिः।।किंतु परामर्शानुमितिप्रतिबंध्य एवेतिसि
द्धांतमतं तन्न प्रत्यक्षस्थले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वेपि अनुमितौ तत्प्रतिबंधकत्वाक
५४ ल्पनेन संशयानुमितौ बाधकाभावः।।संशयत्वस्यार्थसमाजग्रस्तत्वेपि साध्यतदभावव्याप्यवत्तापराम र्शा
भ्यां साध्यतदभाववत्तानुमितौ जायमानायां फलतः संशयानुमितेरुपपत्तेः।।प्रत्यक्षस्थले तदभावव्याप्य
वत्ताज्ञानस्य प्रतिबंधकत्वे कल्पनीये प्रत्यक्षत्वमनिवेश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं
तच्चानुमितिसाधारणमिति कथमनुमित्युत्पत्तिरिति तु नाशंकनीयं।।इच्छाया उत्तेजकत्वानुरोधेन विशिष्यैव प्र
त्यक्षत्वं निवेश्य प्रतिबध्यप्रतिबंधकभावस्यावश्यकत्वात्।।न च शाब्दस्थले इच्छाया अनुत्तेजक
त्वात्।।तथैव प्रत्यक्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति वाच्यं।।प्रत्यक्षा
न्यत्वज्ञानत्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण तदपेक्षया शाब्दत्वस्यैवोत्तेजकत्वेप्रति
बंधकत्वस्याक्लृप्ततया न संशयानुमितौ किंचिद्बाधकमिति।।आचार्याः।।तदभावव्याप्यवत्ताज्ञानवि
शिष्टान्यत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वं इच्छाया विशिष्यावच्छिन्नं प्रति च इच्छा स्या २
त्वेन हेतुत्वमिति आहुः।।यदनुमितेरनंगीकारेण तदभावव्याप्यवत्ताज्ञानसत्त्वे इच्छाबलादनापितद

तत्प्रतिबध्यतावच्छेदकत्वात् परोक्षत्वजातेरनुभवैकत्वेन संकरान्न तस्यापि तत्त्वमिति।।अनुमितौ

साधव्याप्यवत्ताज्ञानात्साधरूपकारणबलात्संशयानुमित्युत्पत्तिरिति दिक्कान्नाप्यवत्साह ॥ अवच्छिन्नसाध्यकत्वमि
ति ॥ न चैवं धूमवान्नाकाशादित्यादेरसंग्रह इति वाच्यम् ॥ स्वरूपासिद्ध एव तन्निवेशात् ॥ केचित्तु ॥ केवलान्वयिध
र्मावच्छिन्नपक्षकत्वमनुपसंहारित्वे उदाहरणं च सर्वमनित्यं प्रमेयत्वादित्यादि ॥ व्यतिरेकव्याप्तिग्रहप्रतिबंधक
स्यात्र दूषकताबीजमित्याहुः ॥ साध्येति ॥ साध्यतावच्छेदकसंबंधेन साध्याधिकरणे हेतुतावच्छेदकसंबंधे
नावृत्तित्वमित्यर्थः ॥ तेन समवायेन वन्हिसाध्यतायां संयोगेन धूमहेतोः संयोगेन वन्ह्यधिकरणवृत्तित्वेपि गो
त्वाधिकरणेऽश्वत्वस्य कालिकादिना वर्त्तमानत्वेपि च नाव्याप्तिः ॥ साध्यतावच्छेदकावच्छिन्नाधिकरणनिरू
धिकरणतानिरूपकतानवच्छेदकहेतुतावच्छेदकावच्छिन्नमिति निष्कर्षः ॥ तेन गुणकर्मान्यत्वविशिष्टसत्तावा
न् गुणत्वात् गुणे गुणकर्मान्यत्वविशिष्टसत्ताद्यादौ यथायथं नाव्याप्तिः ॥ उपाधीति ॥ असाधारणत्वनि
रूढत्वाद्युपाधीनां भेदादित्यर्थः ॥ विरुद्धत्वज्ञानेऽसाधारणत्वादिज्ञानेपि अनुमितिप्रतिबंधादीनताभावः ॥
सन्प्रतिपक्षः साध्यविरोधी परामर्शः तद्वान् अहेतुः सत्प्रतिपक्ष इति योगार्थमभिप्रेत्याह ॥ पक्षेति ॥ अ
त्साध्यधीप्रतिबंधकपरामर्शः सत्प्रतिपक्ष इत्येतावदेव सामंजस्ये पक्षेति संपादनाया नमिति कश्चित् ॥
तन्न ॥ पक्षविशेष्यकसाध्याभावव्याप्यवत्तापरामर्शस्य न तन्त्रादिविशेष्यकसाध्यवत्ताज्ञानेऽविरोधि
तया पक्षविशेष्यकत्वलाभाय तत्स्यावश्यकत्वात् ॥ इदं च सत्प्रतिपक्षस्यानित्यत्वदोषत्वांगीकर्त्तृ

न्या॰प्र॰ ६६

अनुमान ६६

प्राचीनमते लक्षणं बोध्यं ॥ बाधभ्रमादनुमितिप्रतिबंधकस्यापि अनित्यदोषत्वापत्तेः ॥ सद्धेतोर्नाभासत्वमि
तिसत्प्रतिपक्षस्यनानित्यदोषत्वमिति । स्वमते तु पक्षे साध्याभावव्याप्यहेतुमत्त्वं सत्प्रतिपक्षः अत एवोभ
यमतसाधारणायासद्धेतुत्वमेव यथाजलमिश्रादिनोदाहृतवान् ॥ नेत्युक्तमिति । उक्तसाध्याभावव्याप्यपक्षजस्य
वदिदमिति ज्ञानमुक्तरूपसाध्यधीप्रतिबंधकमिति भावः ॥ सत्प्रतिपक्षफलं तु परस्परप्रतिबंधेन परस्परा
नुमितिप्रतिबंध एव । तथाहि । पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यादौ वह्निव्याप्य
वत्तापरामर्शसत्त्वान्न वह्न्यभावानुमितिः वह्न्यभावव्याप्यवत्तापरामर्शसत्त्वाच्च न वह्न्यनुमितेरुत्पत्तिः । तद्विशि
ष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादिति ॥ निबंधनकृतस्तु ॥ प्रकृतसाध्य
साधकहेत्वोः किं तत्त्वमिति जिज्ञासासैव सत्प्रतिपक्षफलं । अत एव वह्नितत्कार्यसाध्यसाधकहेत्वोः किं तत्त्वमि
तिजिज्ञासाजनिकासैव पक्षधर्मतोपस्थितिः प्रकरणसम इति तल्लक्षणमपास्तम् ॥ रत्नकोशकारास्तु ॥
तत्प्रकारकप्रत्यक्षे तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वेऽपि प्रयोजनाभावेनानुमितौ तत्प्रतिबंधकत्व
स्याकल्पनात् ॥ संशयत्वस्यार्थसमाजग्रस्तत्वेऽपि साध्यतदभावव्याप्यवत्तापरामर्शाभ्यां जायमानानुमितिः
संशयरूपैव जायते उभयप्रकारकत्वे निश्चयत्वायोगात् ॥ संशयानुमितिरेव सत्प्रतिपक्षफलमिति ॥ नन्व
तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकारकोपनीतभानानुदयेन तत्र तत्प्रतिबंधकत्वे कल्पनीये प्रत्यक्षत्वमनि
वश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति कथमुभयपरामर्शकाले

उक्तस्यविधेयकानुमितिरितिचेन्न ॥ इच्छाकाले आहार्यप्रत्यक्षोत्पत्त्याचाक्षुषत्वस्पार्शनप्रकारकेच्छानांउत्तेज
कत्वानुरोधेनविशिष्यप्रतिबंधकतायाआवश्यकत्वात् ॥ घटस्पार्शनसामग्रीसत्वेघटचाक्षुषेच्छायामसत्यां
च चाक्षुषसामग्र्यांघटस्पार्शनापत्तेस्तासामेकत्रानिवेशायोगात् ॥ तत्तत्सामग्रीविशिष्टतत्तदिच्छाकूटस्योत्तेज
कत्वेचातिगौरवमिति । नचशाब्दस्थलेइच्छायाअनुत्तेजकत्वात्तत्रैवप्रत्यक्षान्यज्ञानत्वंतत्प्रतिबध्यतावच्छेद
कंतच्चानुमितिसाधारणमितिवाच्यं ॥ प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथोविशेषणविशेष्यभावेविनिगमनाविरहे
णतदपेक्ष्यशाब्दत्वस्यैवतत्प्रतिबध्यतावच्छेदकत्वात् ॥ परोक्षत्वजातेरनुभवत्वेनसंकरप्रतस्यापितत्त्वमि
तितत्प्रतिबंधकस्याकूटतयानसंशयानुमितौकिंचिद्बाधकमिति ॥ अत्रकेचित् ॥ इच्छायाउत्तेजकत्वा
नुपगमेनतदभावव्याप्यवत्ताज्ञानस्येच्छाज्ञानविशिष्टान्य । यावच्छिन्नंप्रतितदभावव्याप्यवत्ताज्ञानत्वेनैक
छा ७ मेवप्रतिबंधकत्वं ॥ इ[illegible]विशिष्टत्वावच्छिन्नंप्रतिइच्छात्वेनहेतुतयाएककार्यकारणभावेनैवनिर्वाहेतस्या
अनुमितिसाधारणतयानसंशयानुमितिरूपत्वमर्हतितदभावव्याप्यवत्ताज्ञानस्याविरोधिनःसत्वात् ॥
आहार्यानुमितेरनंगीकारेणेच्छाकालेपितदुत्पत्त्यसंभवादितिनिगर्वः ॥ असिद्धिंनिरूपयति ॥ असि
द्धिस्त्विति ॥ परामर्शेति ॥ व्याप्तिप्रकारकपक्षधर्मताज्ञानंपरामर्शः तत्प्रतिबंधकत्वंव्याप्यत्वासि
द्धेः ॥ व्याप्तिज्ञानविघटकत्वेनैतद्विषयव्यभिचारादावतिप्रसंगात् ॥ व्यभिचारादन्यत्वंप्रतिबंधकता ॥
वच्छेदकधर्मेविशेषणं ॥ परामर्शप्रतिबंधकज्ञानविषयत्वमित्युक्तौघटादेरपिसमूहालंबनात्मक
ज्ञानविषयत्वादतिव्याप्तिरतःप्रतिबंधके [illegible]च्छेदकपर्यंतानुधावनं ॥ अवच्छेदकत्वंविषयतया
तो
स्वरूपासिद्ध्याश्रयासिद्ध्योस्तुपक्षधर्मताज्ञानविघटकत्वेन । व्यभिचारज्ञानस्यापिव्याप्तिज्ञानविघटकत्वेन ३

तर्क॰सं॰६८

+ पक्षतेति । पक्षतावच्छेदकस्याभाव इत्यर्थः । गगनीयत्वेति । गगनीयकमलाप्रसिद्धिरिति भावः +६

अनुमान ६८

तत्र प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणत्वं तेन । असिद्ध्यादिघटकेनातिव्याप्तिरिति ॥ स्वरूपासिद्ध्याद्यन्यतम
त्वमेव तत्त्वमिति केचित् ॥ साश्रयासिद्धिः ॥ यथाक्रमेण लक्षणमाह ॥ पक्षेत्यादिना ॥ पक्षतावच्छेदकाविशिष्टपक्षे हेतु
तावच्छेदकावच्छिन्नहेतोरभावः ॥ स्वरूपासिद्धिरित्यर्थः ॥ तेनोत्पन्नकालीनो घटः पृथिवी गंधप्रागभावादित्या
दौना प्रसंगः ॥ न वा द्रव्यं सत्वादित्यादौ विशिष्टस्यानतिरिक्ततया विशिष्टसत्ताभावप्रतियोगिनि सत्वेतिव्या
प्तिः ॥ तत्रापि उत्पत्तिकालीनत्वरूपपक्षतावच्छेदकविशिष्टे गंधप्रागभावस्य विद्यमानत्वेन हेत्वभावासत्वात् ॥
सत्तात्वावच्छिन्नाभावस्य गुणे सत्वाच्च यथोक्तेन दोषः ॥ एतदुभयेति ॥ स्वरूपासिद्धिराश्रयासिद्धिभिन्न
त्वविशिष्टासिद्धित्वं व्याप्यत्वासिद्धत्वमित्यर्थः ॥ तद्द्वयवारणाय उभयभिन्नेति ॥ घटादिवारणाय च विशेष्य
दलमिति ॥ धूलीपटलवृत्ति ॥ पर्वतो वह्निमान् धूलीपटलादित्यादौ धूलीपटले वह्निव्याप्यसत्वेन धूमादि
भिन्नवह्निव्याप्याभावकूटस्यासत्वादिति भावः ॥ यथाश्रुते तु धूमभिन्नव्याप्याभावस्यालीकेपि सत्वात्तस्या
व्याप्यासिद्धत्वप्रसंगः साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वादिति ॥ ननु पर्वतः कांचनमयवह्निमान् धूमात् एवं प
र्वतो वह्निमान् कांचनमयधूमादित्यादौ साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः ॥ एवं हेतौ हेतुतावच्छे
दकाभावो हेत्वप्रसिद्धिरित्येवंरूपयोः साध्याप्रसिद्धिहेत्वप्रसिद्ध्योरपि आश्रयासिद्धिवत् अतिरिक्तत्वसं
भवेनासिद्धेस्त्रिविधत्वानुपपन्नमित्यत आह ॥ साध्याप्रसिद्धिरिति ॥ वाशब्दोप्यर्थे तथा च साध्या
प्रसिद्धिहेत्वप्रसिद्धिरपि व्याप्यत्वासिद्धिरित्यर्थः ॥ हेतुतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्न

मनुर

ति

ख ५

निरूपितनियतसामानाधिकरण्यमेव व्याप्तिः साध्यतावच्छेदकहेतुतावच्छेदकयोरप्रसिद्धौ तादृशव्याप्तेरसंभ
त२ वितत्वे नैतयो व्याप्यत्वासिद्ध्यंतर्गतत्वमेव ॥ आश्रयासिद्धेस्तु तथात्वासंभवादतिरिक्तत्वमेवेति नासिद्धिप्रसि
द्धेरैव व्याप्त्यनुपपत्तिरिति भावः ॥ यस्तु नस्तु ॥ स्वरूपासिद्ध्याश्रयासिद्धिभिन्नत्वविशिष्टासिद्धित्वस्य
व्याप्यत्वासिद्धित्वगौरवात् लघुलक्षणांतरमाह ॥ साध्याप्रसिद्धिरिति ॥ पर्वतो वह्निमान्नीलधूमादित्यादौ
नीलरूपविशेषणस्य संकोचकविशेषणत्वेन नानीलधूमत्वं व्याप्यतावच्छेदकं व्यभिचाराभावरूपत्वात् ॥
व्याप्तिग्रहानोपाधिकत्वाच्च किंतु धूमत्वमेव तथा स्वसमानाधिकरणव्याप्यतावच्छेदकांतराघटितधर्म
स्यैव व्याप्यतावच्छेदकत्वनियमात् धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति ॥ स्वस्यापि स्वघटि
तत्वात् ॥ अनंतरेति ॥ तद्घटितत्वं च तद्विषयकप्रतीतिविषयत्वमेव ॥ तथा च नीलधूमत्वावच्छिन्ने व्याप्य
तावात् व्याप्यत्वासिद्ध एवैतदंतर्भावः ॥ अत एवैतदुद्भावने वादिनिग्रहोऽपि ॥ ननु व्या[illegible]के व्यर्थविशे
षत्वं ॥ न दोषः ॥ व्याप्ये तु दोष इति नियमे किं विनिगमकमिति चेत्तद्वेहि ॥ हेतुतावच्छेदकावच्छिन्नसाध्य
सामानाधिकरण्यमेव हि व्याप्तिः ॥ एवं च समनियतत्वे लघुधर्मावच्छेदके सत्त्ववति गुरोरतद्भावादिति
न्यायेन स्वरूपसंबंधरूपावच्छेदकस्य गुरुधर्मेणानंगीकारात् ॥ नीलधूमत्वावच्छिन्नसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वत्वस्य धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वापेक्षया गु
रुत्वेन प्रतियोगितानवच्छेदकतया तादृशाभावाप्रसिद्ध्या न तेन रूपेण व्याप्तिरिति ॥ केचित्तु यावद्वि
मान्नास्तीति प्रतीतेरविशेषात् गुरुधर्मोऽपि प्रतियोगितावच्छेदकः ॥ एवं च स्वसमानाधिकरणतादृशा
हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वबोधकाबोधकोक्तसाध्यतावच्छेदकावच्छिन्न
वच्छिन्ना १

र्क॰प्र॰६८

अनुमान६८

धर्मान्तराघटितधर्मस्यैव व्याप्यतावच्छेदकत्वमिति नियमस्याप्रयोजकत्वात्॥ नीलधूमत्वमपि व्यापकतावच्छेदकमेव अत एव नीलधूमत्वादेरवारणीयत्वमिति दीधितिकारोप्याह॥ न चैवं तदुद्भावने वादिनिग्रहानुपपत्तिः॥ मन्मते तेन रूपेण व्याप्यत्वासिद्ध्यैव तन्निग्रहोपपत्तेरिति वाच्यं॥ धूमादिवक्तव्ये नीलधूमादेरप्युक्तिरनुचितेति॥ अधिकोक्त्या वादिनिग्रहादित्यास्तां पल्लवितेन॥ बाधं लक्षयति॥ पक्षेति॥ पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वमित्यर्थः॥ तेन रूपे[illegible]कालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ आद्यक्षणावच्छेदेन घटे गन्धाभावसत्त्वेऽपि नातिव्याप्तिः॥ एवं महानसीयवह्न्यभावस्य पर्वते सत्त्वेऽपि न पर्वतो वह्निमान् धूमादित्यादेर्बाधितत्वापत्तिरिति॥ बाधदशायामपक्षधर्मो हेतुरनैकान्तिको वेति नियमात् बाधस्य प्रतिबन्धकत्वे मानाभाव इत्याशङ्कते॥ न चेति॥ अग्रेति॥ अत्र ह्रदो वह्निमान् धूमादित्यादौ॥ असिद्धिरेव॥ स्वरूपासिद्धिरेव॥ कर्तव्यर्थ॥ बाधेनेति॥ बाधस्य प्रतिबन्धकत्वेनेत्यर्थः॥ परामर्शो जातः॥ वह्निव्याप्यधूमवान् ह्रद इति परामर्शोदयेनासिद्ध्यादेरदूषकतया बाधस्यैव दोषत्वमिति भावः॥ ननु वह्निव्याप्यवत्ताज्ञानकाले कथं वह्न्यभाववत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकस्य सत्त्वादिति चेन्न॥ अलौकिकज्ञानत्वावच्छिन्नप्रसेव तदभावव्याप्यवत्ताज्ञानस्य विरोधितया अनुमानिकभिन्नेन्द्रियादिजन्यवह्निव्याप्यवत्ताज्ञानकालेऽपि प्रात्यक्षिकवह्निव्याप्यवत्ताज्ञानादपि बाधकार्यत्वादिति भावः॥ असंकीर्णबाधस्थलमाह॥

142

ननु पक्षतावच्छेदकावच्छेदेन तदनुमितिः ६ त् यथा व्यभिचारादेर्यथा हेत्वाभासत्वं तथोपाधेरपि स्यादुपाधिज्ञानस्यापि व्यभिचारज्ञानद्वारा व्याप्तिज्ञानविघटकत्वेनानुमितिप्रतिबंधकतानविषयत्वात्॥ ३

आधकालावच्छिन्नेति॥ दोषांतरेति॥ असिद्ध्यादिरूपदोषांतरेत्यर्थः॥ दोषांतराभावमेवोपपादयति॥ व्याप्यसत्वे व्यभिचारित्वमेव पक्षावृत्तित्वे च स्वरूपासिद्धिरेव दोषः स्यात् ततः व्याप्तिपक्षधर्मत्वयोरुभयोरभावे निराकरणं॥ यद्यपि धर्मितावच्छेदकसामानाधिकरण्येन तदभाववत्ताज्ञानस्य धर्मितावच्छेदकसामानाधिकरण्येन तत्प्रकारकबुद्धौ न तत्प्रतिबंधकत्वं तथाप्यवच्छेदकावच्छेदेन तद्विशिष्टबुद्धौ अवच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्याविरोधित्वेनेति बोध्यं॥ ननु गंधव्याप्यपृथिवीत्ववत्तापरामर्शाज्जायमाना घटो गंधवानित्यनुमितिः॥ पक्षतावच्छेदकव्यापकत्वविशिष्टसंबंधघटितव्यापकतायाः गंधेऽग्रहात् व्यापकताघटकसंबंधेनैव व्यापकस्यानुमितेः॥ तथाच सद्धेतोरस्य कथं बाधितत्वमित्यत आह॥ दीधितिः॥ अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकत्वविशिष्टसंबंधेन व्यापकत्वावगाहिपरामर्शस्य साध्यतावच्छेदकसंबंधघटितव्यापकत्वावगाहि॥ अवच्छेदकावच्छेदेन हेतुमत्तावगाहिपरामर्शयोरन्यतरस्य जनकत्वेन प्रकृते गंधप्रागभावकालत्वावच्छिन्नत्वविशिष्टसमवायघटितगंधनिष्ठव्यापकत्वावगाहिपरामर्शासिद्धत्वेऽपि गंधप्रागभावकालत्वावच्छिन्नत्वविशिष्टसमवायसंबंधेन पृथिवीत्वरूपहेतुमत्तावगाहिपरामर्शसत्वमक्षतमेवेति भावः॥ ननु व्यभिचारज्ञानस्यानुमितिकरणव्याप्तिज्ञानविघटकतया परंपरयानुमितिप्रतिबंधकतानविषयत्वात्॥ तथाच पंचैव हेत्वाभासा इत्यनुपपन्नमित्यभिप्रेत्याशंकते॥ न चेति॥ एत एवेति॥ पंचैवेत्यर्थः॥ तदन्यतमस्येति॥ सव्यभिचाराद्यन्यतमांतर्गत[illegible]स्य॥ दस्यर्थः॥ तस्य उपाधेः॥ अनैवंभूतत्वात्॥ अहेत्वाभासत्वात्॥ अतएव व्यभिचाराद्यन्यतमांतर्गतत्वासंभवादेव॥

तु गंधप्रागभावकालावच्छेदेन घटे जायमानानुमितिर्भ्रम एवेति तस्याभासत्वं ४

नस्त्वस्तु॥ सत्प्रतिपक्षोपाधिज्ञानेउपाधिनाव्याप्तिबाधानुमानेव्याप्तिज्ञानप्रतिबंधाभावादनुमितिप्रसंगाच्चेदनुमितिक
रणव्याप्तिज्ञानविघटकत्वात्तावता परमुखनिरीक्षकतया[illegible]नहेत्वाभासत्वं॥ एवंसिद्धसाधनस्यापिपक्षता
विघटकतयानत्वमिति॥ वादिविजयस्यैककार्यकारित्वेसंगत्याहेत्वाभासानंतरमुपाधिनिरूपणमारभ
ते॥ नन्विति॥ आचार्यमतेउपाधिपदंपंकजादिवद्योगरूढं उपस्वसमीपवर्तिनिस्वीयंधर्ममादधातीतिउपा
धिरितियोगात्स्वनिष्ठव्याप्तिरूपधर्मसंक्रामकत्वंव्याप्यसाध्यव्यापकत्वं॥ नकेवलंसाध्यव्यापकत्वमात्रेण
दूषकत्वमितिसाध्यव्यापकत्वेरूढिरपि॥ तथात्वसाध्यसमव्याप्तत्वघटितत्वमेवोपाधिलक्षणंतन्नुनसा
ध्यसमव्याप्तस्यैवोपाधित्वे विषमव्याप्तेपिव्यभिचारोन्नायकत्वसत्प्रतिपक्षोन्नायकत्वादिरूपदूषक
ताबीजस्यसत्त्वेपिनतस्योपाधित्वात्तच्च व्याप्यव्यापत्तेरितिसाध्यव्याप्यसंग्राहकपदापरूढार्थसाध्य
व्यापकत्वमात्रघटितलक्षणमाह॥ साध्यव्यापकेसतीति॥ ननुव्यापकत्वंतद्वन्निष्ठात्यंताभावाप्रतियोगित्वं
तद्धातियोगित्वंवाव्यापकत्वं एवंचसाध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वेसतिसाधनसमाना
धिकरणात्यंताभावप्रतियोगित्वमितिस्यात् तत्रध्वंसत्वादित्यादौसंयोगाद्युपाधावव्याप्तं अतिव्याप्तं
चद्रव्यंपृथिवीत्वादित्यादौसंयोगादौ उभयत्रप्रतियोगिवैयधिकरण्यनिवेशेचातिगौरवंसाध्यत्वसा
धनत्वयोः व्यापकत्वव्याप्यत्वरूपतया व्यभिचारिणितदसंभवः॥ साध्यत्वप्रकारकज्ञानविषयत्वसाध
नत्वप्रकारकज्ञानविषयत्वादीनांतयोर्निवेशोभ्रमात्मकज्ञानमादायप्रसिद्धिसंभवेपिभ्रमत्वनतादृशोत्तमस्त

व्यानुपपत्तिर्जागरूकैवेत्यत आह ।। तद्व्यापकं चेति ।। लाघवादसार्वगर्भव्यापकत्वमाह ।। तदिती निरुक्ष्यत ।। तत्समानाधिकरणादिति ।। तद्धर्मावच्छिन्नसमानाधिकरणा यावन्तो यद्धर्मावच्छिन्नसमानाधिकरणत्वाद्वत् तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नव्यापकत्वमित्यर्थः ।। अत्र यावत्सदोनुपादाने वह्निमान् धूमादित्यादौ साधनाव्यापकस्य रासभादेर्वह्निसमानाधिकरणमहानसत्वादिरूपे यत्किंचिद्धर्मनिष्ठसामानाधिकरण्यनिरूपकत्वे सौलभ्येपि न रासभादावतिव्याप्तिः ।। यावत्त्वस्य व्यापकत्वादन्यस्य दुर्वचतया तत्समानाधिकरणत्वव्यापकसामानाधिकरण्यनिरूपकत्वमर्थः पर्यवस्यति ।। तदव्यापकत्वं च तत्समानाधिकरणत्वसमानाधिकरणाभावप्रतियोगीसामानाधिकरण्यनिरूपकत्वं ।। सर्वस्यापि छित्वादिना तादृशाभावप्रतियोगित्वादाह ।। तद्वन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तदर्थो वाच्यः ।। तथा च तादृशप्रतियोगितानवच्छेदकप्रमेयत्वमादायातिप्रसंगवारणाय यद्धर्मावच्छिन्नसमानाधिकरणत्वं तद्धर्मावच्छिन्नसमानाधिकरणत्वनिष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मत्वमेव तद्धर्मावच्छिन्नव्यापकत्वं ।। एवमव्यापकत्वं तत्समानाधिकरणत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकसामानाधिकरण्यकत्वं बोध्यं ।। तद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितानवच्छेदकसामानाधिकरण्यत्वावच्छिन्नसामानाधिकरण्य ।। निरूपकतावच्छेदकत्वे सति यद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छे

145

दकेपद्र पंताद्धर्मावच्छिन्नस्तद्धर्मावच्छिन्नसाध्यसमानाधिकरणतद्धर्मावच्छिन्नहेतावुपाधिः॥ गुणकर्मान्यत्व
विशिष्टसत्तावान्जातेरित्यत्र विशिष्टसत्तायाः सत्तानतिरेकितया सत्तासाध्यव्यापकतया साध्याव्यापकत्वे
ऽसंगेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ सत्त्वाद्यव्यापकतया साधनाव्यापकत्वप्रसंगेन संयोगादाव
व्याप्त्यतिव्याप्त्योर्वारणाय लक्षणे तद्धर्मावच्छिन्नत्व यद्धर्मावच्छिन्नत्वयोर्विशेषणनिवेशः॥ लक्ष्ये लक्षणं
गमयति॥ यथेति॥ तत्र ईंधनं॥ तत्समानाधिकरणत्वात्॥ आर्द्रेंधनसमानाधिकरणत्वात्॥ धूमसमानाधि
करण महानसादिनिष्ठाभावप्रतियोगी सामानाधिकरण्यनिरूपकत्वेन धूमव्यापकत्वमक्षतमिति भावः॥
अयःपिंड इति॥ वह्निसमानाधिकरणायःपिंडत्वनिष्ठाभावप्रतियोगी सामानाधिकरण्यनिरूपकत्वे
न ह्यव्यापकत्वादिति भावः। सत्ता तु वह्निमान्धूमादित्यादौ तु नैवं॥ न वह्निव्यापकः धूमव्यापकः कश्चिदित्यर्थः॥
ननु पक्षातिरिक्ते साध्यव्यापकताग्रहात् उपाधेर्दूषकत्वं तच्च महानसाद्यंतर्भावेन वह्निव्यापकस्य पर्वतवृध
माव्यापकस्य पक्षेतरत्वस्यैवोपाधेः संभवात् कथं न तत्रोपाधिरित्यत आह॥ न हेतोरिति॥ हेतोर्धूम
स्य साध्यव्याप्यत्वात्॥ वह्निव्याप्यत्वात्॥ ननु ततः किमित्यत आह। साध्यव्यापकस्य चेति॥ तथा च पक्षे
तरत्वं वह्न्यव्यापकं वह्निव्याप्यधूम[illegible]व्यापकत्वादित्यनुमाने न धूमस्य वह्न्यव्याप्यत्वं सिद्ध्यतां व्याप्तिग्रह
स्योत्पन्नस्य समत्वादिति वाच्यं॥ धूमत्वावच्छिन्नं प्रति वह्नित्वेन हेतुतया कार्यकारणभावरूपानुकूलतर्क
सत्त्वात्तत्त्वादेव धूमे वह्निव्याप्यत्वसिद्ध्या तद्व्यापकत्वेन पक्षेतरत्वे वह्न्यव्यापकत्वनिश्चयादिति भावः॥
साध्याव्यापकत्वान्न पक्षेतरत्वोपाधिः॥ न च धूमः वह्न्यव्याप्यः वह्निव्यापकपक्षेतरत्वाव्याप्यत्वादित्यनेन न ३

इदंचोपाधिलक्षणमाधवाकारादृति । मित्रातनयस्यपक्षत्वे साधनावच्छिन्नसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्य
व्यापकयोरैक्यप्रसंगेन वक्ष्यमाणदोषासंगतेरनयोरसंकरप्रदर्शनाय काकपर्यंतानुधावनं ॥ तत्र । शाकपाकज
त्वं ॥ श्यामत्वेति ॥ शुद्धश्यामत्वव्यापकत्वमित्यर्थः । किंचेति ॥ साधनीभूत मित्रातनयत्वावच्छिन्नश्या
मत्वव्यापकत्वमित्यर्थः । विवक्षितमिति । मित्रातनयत्वरूपसमानावच्छिन्नश्यामत्वव्यापकत्वात् गौरमित्रा
तनयेऽव्याप्तित्वेन च मित्रातनयत्वरूपसाधनाव्यापकत्वाच्च । शाकपाकजत्वेन लक्षणसमन्वयः ॥ शु
द्धसाध्यव्यापके आर्द्रेंधनादौ शुद्धसाध्यव्यापकत्वादेव सुतरां साधनावच्छिन्नसाध्यव्यापकत्वमितित्वाक ॥
वायुरिति ॥ वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्युक्ते प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनावच्छिन्नप्रत्य
क्षत्वव्यापकत्वाव्याप्यसंगतिरतः प्रमेयत्वपर्यंतानुधावनं ॥ तत्र रूपवत्त्वं । ननु शुद्धसाध्यव्यापकसाधनाव
च्छिन्नसाध्यव्यापको नयबहिर्द्रतस्य नोपाधित्वमेवेत्यत आह । किंचेति ॥ तथा च साधनावच्छिन्नसा
ध्यव्यापकस्येव पक्षधर्मावच्छिन्नसाध्यव्यापकस्यापि व्यभिचारोन्नायकत्वादिरूपदूषकताबीजसाम्येनोपा
धितया तत्राव्याप्तिरिति भावः ॥ तद्वतीति ॥ बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववतीत्यर्थः ॥ बहिष्ट्वं चात्मान्य
त्वं मानसान्यत्वं वा तदवच्छिन्नप्रत्यक्षत्वं रूपादावपि तच्च न रूपसत्त्वमिति द्रव्यत्वनिवेशः । द्रव्यत्वावच्छि
न्नप्रत्यक्षत्वमात्मादावपीति बहिष्ट्वनिवेशः ॥ यथोक्तस्थले । काकः श्यामो मित्रातनयत्वादित्यादौ ॥
तथाविधेति । पक्षधर्मेत्यत्र द्रव्यत्वावच्छिन्नेत्यर्थः । पक्षेकाकादौ ॥ प्रसज्यादिति । इदमुपलक्षणं ॥ आ

त्वाबोविनाशीप्रमेयत्वादित्यादौजन्यत्वावच्छिन्नेविनाशित्वव्यापकेसावत्वोपाधौउदासीनधर्मावच्छिन्नसाध्य
व्यापकेऽव्याप्तेरित्याशंकते॥अथेति॥क्वचित्॥काकःश्यामोमित्रातनयत्वादित्यादौकश्चिद्वायुःप्रत्यक्षःप्र
मेयत्वादित्यादौधूमवान्वह्नेरित्यत्रशुद्धसाध्यव्यापकार्द्रेंधनादौचपक्षधर्मद्रव्यत्वादिकमादायसंगतिः॥उपाधि
त्वापत्तेरिति॥तथाचदनुमानमात्रोच्छेदइतिभावः॥तादृशवह्निमति॥महानसान्यत्वावच्छिन्नवह्निमतिपर्व
ते॥असत्वादिति॥महानसत्वाभावस्येतिशेषः॥स्वनाधिकरणेति॥स्वंउपाधित्वेनाभिमतंधूमवान्वह्नेरित्या
दौस्वंआर्द्रेंधनंतदनधिकरणंयत्साध्याधिकरणंअयोगोलकंतद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नधूमव्यापकत्व
दार्द्रेंधनेलक्षणसमन्वयः॥सश्यामोमित्रातनयत्वादित्यादौस्वंशाकपाकजत्वंतदनधिकरणंयन्मित्रातनय
त्वाधिकरणंगौरमित्रातनयःतद्वृत्तिमित्रातनयत्वरूपधर्मावच्छिन्नश्यामत्वव्यापकत्वात्शाकपाकजत्वमु
पाधिः॥एवंवायुःप्रत्यक्षःस्पर्शाश्रयत्वादित्यादौस्वं[illegible]उद्भूतरूपवत्वंतदनधिकरणंयत्प्रत्यक्षस्पर्शाश्रय
त्वाधिकरणंवायुःतद्वृत्तिबहिर्द्रव्यत्वरूपधर्मावच्छिन्नप्रत्यक्षत्वव्यापकत्वादुद्भूतरूपत्वेलक्षणसंगतिः॥व
ह्निमान्धूमादित्यादौतुमहानसत्वाभावोनोपाधिः॥तत्रहिस्वंमहानसत्वाभावःतदनधिकरणंयत्साध्याधि
करणंतद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नवह्निमतिमहानसएवतस्यासत्वान्नातिव्याप्तिरितिध्येयं॥ननुद्रव्यं
सत्वादित्यादौगुणकर्मान्यत्वविशिष्टसत्वेअव्याप्तिःविशिष्टसत्तायाःसत्तानतिरेकतयाविशिष्टसत्तानो
पाधित्वापत्त्यानधिकरणसाधनाधिकरणाप्रसिद्धेः॥एवंधूमवान्वह्नेरित्यत्रार्द्रेंधनादीनांद्रव्यत्वादिनोपाधि

श्र २

चापत्तिश्चेत्यत आह। व्याप्यत्वेति। स्वपदं उपाधितावच्छेदकाभिमतपरं। एवं च विशिष्टस्यानतिरेकेऽपि विशिष्टनिरूपि
ताधिकरणताया अतिरिक्तत्वाद्गुणकर्मान्यत्वविशिष्टसत्त्वावच्छिन्नानधिकरणं सत्त्वाधिकरणं गुणाद्येव प्रसि
सिद्धं तद्भिन्नसत्त्वादिरूपधर्मावच्छिन्नद्रव्यत्वादिव्यापकत्वात् गुणकर्मान्यत्वविशिष्टसत्त्वे लक्षणसमन्वयः॥ धू
मवान्वह्नेरित्यादौ स्वपदेन द्रव्यत्वं नोपपादयितुं शक्यं तत्र द्रव्यत्वावच्छिन्नानधिकरणवह्न्याधिकरणाप्रसिद्धेः॥ किंत्वा
र्द्रेन्धनत्वाद्येव तथात्वाच्चार्द्रेन्धनत्वेनोपाधित्वं न तु द्रव्यत्वेनेति नोक्तदोष इति भावः॥ व्यापकत्वस्याभावादिघटि
तत्वेन गुरुतया लघु तदाह। तद्वेति। तादृशसाध्यव्यापकत्वं चेत्यर्थः॥ धूमवान्वह्नेः वायुः प्रत्यक्षः प्रत्यक्ष
स्पर्शाश्रयत्वात् स च श्यामो मित्रातनयत्वात् इत्यादौ आर्द्रेन्धनोद्भूतरूपशाकपाकजत्वादिरुपाधयः क्रमेण लक्षणं सं
गमयति॥ स वानित्यादिना॥ वह्निमान् धूमादित्यत्र महानसान्यत्वेति प्रसंगं वारयति॥ नन्वेवमिति॥ सद्धेतोः प
वं न च संभवतीत्यन्वयः॥ सद्धेतौ धूमादेः एवं उक्तधर्मावच्छिन्नाक्रान्तः क्वचिदप्युपाधिर्न संभवतीत्यर्थः॥ त
त्राह॥ नहीति॥ वह्निमान्धूमादित्यादौ पक्षेतरत्वानधिकरणधूमवत्पर्वतनिष्ठद्रव्यत्वादिरूपधर्मावच्छिन्न
वह्निसमानाधिकरणाः पर्वतत्वादयोऽपि तेन पर्वतेतरत्वावच्छिन्नसमानाधिकरणा इति पर्वतेतरत्वे तिव्याप्तिरित्य
त आह॥ अत एवेति॥ तादृशधर्मावच्छिन्नसाध्यव्यापकत्वाभावादेवेत्यर्थः॥ तदेवाह॥ पक्षेति॥ धर्मे पर्वतत्वादौ
सहामानाधिकरण्याभावात्॥ पर्वतेतरत्वसामानाधिकरण्याभावात्॥ वह्निरनुष्णः कृतकत्वादित्यादौ पक्षेवा
धेन साध्यव्यापकतया अभिमते वह्नीतरत्वादौ बाधोन्नीतत्वासंयाप्यत्वमेवेति हृदयं॥ उपाधेर्दूषकताबीजं व्य
भिचारोन्नायकत्वं सत्प्रतिपक्षोन्नायकत्वं वा॥ तथाहि॥ धूमवान्वह्नेरित्यत्र वह्निः धूमव्यभिचारी धूमव्यापका

149

द्रेंधनव्यभिचारित्वात्॥ व्यापकव्यभिचारित्वे व्याप्यव्यभिचारित्वस्यावश्यकत्वात्॥ एवं वह्निमदयोगोलकं धूमाभाववत्॥ व्यापकाभावे व्याप्याभावावश्यंभावादिति व्यभिचारोन्नायकत्वे कथं न सत्प्रतिपक्षोन्नायकत्वेन वार्द्रेंधनस्योपाधित्वात्॥ यथा हेतोः साध्यव्यापकोपाधिव्यभिचारेण साध्यव्यभिचारः साधनीयस्तथा साध्यव्यापकत्वव्यापकतयोपाधेः साध्याव्यापकत्वमपि सेत्स्यतीति विनिगमनाविरहात्॥ व्याप्तिग्राहस्योभयत्रापि सत्त्वादिति वाच्यं॥ अनुकूलतर्कादिनोपाधेः साध्यव्यापकत्वनिश्चये निश्चय एवोपाधेर्दूषकताबीजं चिंतनमित्यभिसंधायाह संक्षेप इति॥ स्वार्थपरार्थभेदेन अनुमानं द्विधा॥ यत्र स्वयं धूमादिलिंगमनुमाय वह्न्यर्थं प्रवर्त्तते तत्स्वार्थानुमानं॥ यत्र तु स्वयं वह्निमनुमाय परप्रतीत्यर्थं वाक्यं प्रयुंक्ते तत्परार्थानुमानं। तत्र स्वार्थानुमानं सुगमत्वादुपेक्ष्य परार्थानुमानप्रकारमेवाह॥ तच्चानुमानमिति॥ ननु पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेत्यादिपंचरूपोपपन्नलिंगप्रतिपादकवाक्यत्वं न्यायत्वं पंचरूपोपपन्नो धूम इति वाक्ये अतिव्याप्तेरतो न्यायत्वं निर्वक्ति॥ न्यायश्चेति। धूमात्पर्वतो वह्निमानित्यादिरनुक्रमोक्तप्रतिज्ञादिसमुदायेति व्याप्तिवारणाय क्रमिकेति॥ कथकसंप्रदायविरुद्धेत्यर्थः॥ न्यायत्वं पंचसु पर्याप्तमिति सूचनाय समुदाय इति। तेन पंचग्रहणेनैव समुदायलब्धेः समुदायग्रहणेनेति दूषणमनवकाशं॥ तथाचायं। तस्मात्तथेत्युपनयनिगमने प्राचां मतेन नवीनमतेनाह॥ वह्निव्याप्येत्यादि॥ प्रतिज्ञाद्यघसानेतद्घटितन्यायत्वात् ज्ञानार्थां परार्थासंलवरति प्रतिज्ञात्वादिकं लक्षयति। तत्रेति। तेषु॥

प्रतिज्ञात्वादिकं प्रध्यय इत्यर्थः ॥ तत्र सर्वेषां विस्पष्टं इति कक्षित् ॥ पर्वतो वह्निमानित्युदासीनवाक्येऽतिव्याप्तिवारणाय न्या
यघटके ति ॥ पर्वतो वह्निमानालोकादिति न्यायांतरघटकप्रतिज्ञायाः पर्वतो वह्निमान् धूमादिति न्यायघटकप्रतिज्ञात्वा
पत्तिवारणाय एतन्याये ति ॥ अवयवे ति ॥ अवयवविभाजकोपाधिपंचोपाधयः प्रतिज्ञात्वहेतुत्वउदाहरणत्वउपनयत्वनिगम
नत्वभेदात् ॥ तत्र यथायोगं लक्षणान्यवसेयानि ॥ पक्षे साध्यनिर्देशः प्रतिज्ञेति सूत्रं पक्षविशेष्यकसाध्यप्र
कारकज्ञानजनकं वाक्यं प्रतिज्ञेत्यर्थकं तच्च पर्वतो वह्निमान् इत्युदासीनवाक्येऽतिप्रसक्तमित उक्तं क्रितं ॥ एतद्धूमा
दिति ॥ अथोदासीनवाक्येऽतिव्याप्तिवारणाय न्यायघटके ति ॥ पर्वतो वह्निव्याप्यधूमादिति हेत्ववयवे पर्वतो वह्निमान् धू
मादिति हेत्ववयवत्ववारणायैतन्यायघटके ति वक्तव्यतया सायोक्तं एतदिति ॥ एतन्यायघटकीयो धूमादितिशब्दे ब्द
द्वत्यर्थः ॥ तादृशेति ॥ अवयवविभाजकस्यर्थः ॥ प्रतिज्ञात्वहेतुत्वघटकीभूतमवयवत्वं निर्वक्ति ॥ अवयवत्वं चेति ॥
अत्रैव प्राचीनसंवादमाह ॥ उक्तं चेति ॥ ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाभिन्नत्वे सति हेत्वादिभिन्नत्वं चाभिन्न
त्वेन च प्रतिज्ञात्वं पर्वतो वह्निमानिति भागयोः प्रत्येकं पर्याप्तं व्यासज्यवृत्ति वा ॥ आद्ये प्रतिज्ञात्वावच्छिन्नप्र
तियोगिताकभेदस्यैतद्घटकेऽसत्वेन प्रतिज्ञैकदेशेऽतिव्याप्तिः ॥ द्वितीये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभे
दस्य प्रत्येकं पर्वतो वह्निमानिति भागयोः सत्वेन प्रतिज्ञाभिन्नत्वात्तादृशभागद्वयभेदस्य प्रतिज्ञायामसंभवदिति
चेन्न ॥ प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नप्रतियोगिताकभेदाधिक
रणतावच्छेदकं यत्तदवच्छिन्नत्वस्य विवक्षितत्वात् ॥ प्रतिज्ञात्वस्य व्यासज्यवृत्तित्वोपगमेन प्रतिज्ञैव
देन प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदरूपत्वात्प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरण

तावछेदकं पर्वतीशंतिसागत्वं तदवछिन्नप्रतियोगिताकभेदाभेदाधिकरणतावछेदकं च प्रतिज्ञात्वत्वं प्रतिज्ञा ॥ प्रतिज्ञैकदेशातिप्रसक्तायतो ॥ व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमात् ॥ प्रतिज्ञाहेतुसमुदायो न प्रतिज्ञेति प्रतीतेः ॥ प्रतिहेतुसमुदाये प्रतिज्ञाभेदसत्वान्न प्रतिज्ञाहेतुसमुदाये प्यतिव्याप्तिः ॥ व्यासज्यवृत्त्यधिकरणताकभेदानंगीकारे तु प्रतिज्ञात्वाद्यवछिन्नभेदपंचकाधिकरणतानवछेदकत्वे सति प्रतिज्ञात्वाद्यवछिन्नाधिकरणताकभेदप्रतियोगितावछेदकं यत्तदवछिन्नप्रतियोगिताकभेदाधिकरणतावछेदकं यत्तदवछिन्नत्वमर्थोऽवसेयः ॥ प्रतिज्ञैकदेशवारणाय सत्यंतनिवेशः ॥ पर्वतो वह्निमानिति भागयोः प्रत्येकं प्रतिज्ञाभेदसत्वेन तादृशभागद्वयस्य प्रतिज्ञात्वावछिन्नप्रतियोगिताकभेदाधिकरणतावछेदकत्वात् ॥ व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमात् प्रतिज्ञाहेतुसमुदाये प्रतिज्ञाभेदासत्वेन प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणाय विशेष्यदलनिवेशः ॥ तत्र प्रतिज्ञात्वांशे प्रतिज्ञाहेतुसमुदायस्य सत्वेन तादृशभेदप्रतियोगितावछेदकं तादृशसमुदायत्वं तदवछिन्नभेदस्य च तादृशसमुदायेऽसत्वेनातिव्याप्तिविरहादिति ॥ प्रतिज्ञात्वादीनां न्यायघटकत्वं घटकत्वाच्च नोदासीनवाक्येऽतिव्याप्तिरिति ध्येयं ॥ =अत्र प्रतिज्ञादिवाक्यैः खंडवाक्यार्थबोधः वावयैकवाक्यतया न्यायरूपमहावाक्यार्थबोधः ॥ =अवांतरवाक्यार्थज्ञानस्य महावाक्यार्थबोधे हेतुत्वात् ॥ वह्निसंबंध्यभिन्नः पर्वतः धूमीयज्ञानव्याप्यत्वं वीप्सायाः तात्पर्यग्राहकतया वह्निपदस्य धूमव्यापकवह्नेर्लक्षणया यावद्धूमसंबंध्यभिन्नः धूमव्यापकवह्निसंबंध्यभिन्न इत्युदाहरणार्थबोधः ॥ वह्निव्याप्यधूमसंबंध्यभिन्नः पर्वतः वह्निव्याप्यपक्षवृत्तिधूमज्ञानव्याप्यवह्नि

संबंध्यभिन्नः पर्वताभिन्नधूमव्यापकवह्निसंबंध्यभिन्नधूमसंबंध्यभिन्नवह्निव्याप्यधूमसंबंध्यभिन्नः पर्वतः वह्नि
व्याप्यपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्न इति वाक्यैकवाक्यतया न्यायार्थबोधः ॥ ततः न्यायार्थज्ञानसहकृ
तमनसा धूमवान्वह्निमानिति धूमविशिष्टवह्निवैशिष्ट्यमिति न्यायेन मानसज्ञानं जन्यते तेन च परामर्शः उत्पद्यते ॥
ततः परामर्शानुमितिः । न च न्यायार्थज्ञानेनाहत्यैव परामर्श उत्पद्यतां तन्मतेतराविरुद्धवैशिष्ट्यावगाहिज्ञानजननेनैव वा
च्यं ॥ तस्य वाक्यजन्यत्वेनानाप्तोक्तत्वादप्रमाणशंकाकलंकितत्वेनानुमित्युपधायकपरामर्शानुत्पादकत्वात् ॥
अन्यथा आप्तवाक्यादिजन्यायजन्यज्ञानादेवानुमीतिस्वीकारापत्तेः । तथा च न्यायजन्यज्ञानेन तत्पदार्थोपस्था
पने सति धूमविशिष्टवह्निवैशिष्ट्यमिति मनसा परिच्छेदानंतरं परामर्शोत्पाद इत्यंगीकरणीयं ॥ अत एव चिंतामणि
कारेणानुमितिचरमकारणलिंगपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वं न्यायत्वं तादृशशाब्दज्ञानजनक
वाक्यत्वमवयवत्वमिति लक्षणमुपन्यस्तं ॥ यद्यपि विप्रतिपत्तेः पक्षपरिग्रहे हेत्वभिधानस्याकांक्षितत्वेन प्रथ
मं हेत्वभिधानमेवोचितमिति न प्रतिज्ञा न्यायांगं तथापि सम्यग्बंधानाय विप्रतिपत्तेरंतरितत्वेन हेतुवाक्यस्यानि
ष्प्रतियोगिकान्वयबोधासमर्थत्वात् प्रतिज्ञा न्यायांगं ॥ पर्वतो वह्निमान् कुत इत्याकांक्षायां प्रतिज्ञानंतरं हेतूप
न्यासः ॥ अत्र च पर्वतो वह्निमानिति प्रतिज्ञायां ज्ञानविषये वह्नौ लक्षणा ॥ धूमादित्यत्र हेतुत्वं पंचम्यर्थः ॥
तस्य च निरूपकतया प्रतिज्ञैकदेशार्थज्ञानेऽन्वयः ॥ ज्ञायमानलिंगस्यानुमानत्वनये धूमपदं यथाश्रुतमेव लिं
गज्ञानस्यानुमानत्वनये तु धूमपदस्य धूमज्ञानमर्थः ॥ एवं च धूमज्ञानजन्यज्ञानविषयवह्निमानिति

वाक्यैकवाक्यतयाप्रतिज्ञाहेत्वोरन्वयबोध इति केचित्। केचित्तु। प्रतिज्ञायां ज्ञाने न लक्षणा प्रथममनाका
ङ्क्षितत्वात्। किंतु धूमपदस्य धूमज्ञाने पंचम्याश्च ज्ञाप्यत्वे लक्षणा प्रथमस्य प्रविभक्त्यापि लक्षणास्वीकारा
दित्याहुः। एतन्मते सर्वत्रा क्षणिकस्थले ऽन्वयबोधानंगीकारेण सिद्धांतविरोधः। वस्तुतस्तु। पंचम्या ज्ञा
नज्ञाप्यत्वमर्थः। धूमस्य च ज्ञाने ऽन्वयः। ससंबंधिकस्थले एकदेशेऽप्यन्वयस्वीकारादिके प्रकृतायिचारे
णकधूमस्य गमकत्वं व्याप्यपक्षधर्मतया चेति। तत्र व्याप्तिदर्शनायोदाहरणप्रयोगः तत्र यद्धूमवत्तद्
यद्बोध्यतौ हेतायपत्पदेन तदन्यवनयच्छोध्यते। एवं च धूमवन्महानसं वह्निमत् धूमवन्महानसान्यच्च वह्निमदिति वो
धे पाकसाधनाश्रयाश्रितसाध्यसंबंधरूपव्याप्तिरुदाहरणेन प्रदर्श्यते तत्र यत्पद एव वीप्सा न तु तत्पदेपि विरूपे
प्रत्ययोरपि एकेन तत्पदेन परामर्शसंभवात्। सर्वनाम्नां बुद्धिस्थत्वेवाच्यकत्वादिति। अत एव यद्यत्पापं प्रतिज
हि जगन्नाथ न मामस्य तन्मे हृष्यतु। ननु संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा। नरेंद्रमार्गाट्ट
इव प्रपेदे विवर्णभावं स स भूमिपालः। इत्यत्र सा साकल्यानप्रमुखीबक्तेवत्यादौ च कथं तत्र हि तत्पदेपि वीप्से
ति चेत्। यच्च प्रत्येकं यत्पदोपस्थापितं प्रत्येकरूपेणैव तत्र न तत्पदे वीप्सा। यद्यायद्यत्पापं प्रजहाश्चादौ इति
न कश्चिद्दोषः। वस्तुतस्तु। व्यापकसामानाधिकरण्यरूपव्याप्तिबोधकत्वमुदाहरणस्य पदार्थविषय
वाक्यार्थविषयावान संभवतीति वह्निपदस्य धूमव्यापकवह्नौ लक्षणा वीप्सा च तात्पर्यग्राहिका। यत्र य
पदसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वं विधेये भासते तत्र तत्पदे न वीप्सा यथा यो यो धूमवान्

सोसोग्निम[illegible]नस्तत्र यत्तदसमभिव्याहृत ध्रुवत्पदार्थतावच्छेदकीभूतधर्मव्यापक[illegible]र्विधेये वह्नौ भासते॥ यत्र तु यत्त
दसमभिव्याहृतपद[illegible]र्थतावच्छेदकीभूतधर्मसामानाधिकरण्यं विधेये भासते त[illegible]त्रदेवाप्रा॥ यथा सस्सभूमि
पालइत्यादौ [illegible] साक्रियानम्रमुखीव भवेत्यादौ च तत्र यत्तदसमभिव्याहृतपदार्थतावच्छेदकीभूत स्वामिपालत्व
कान्तराधित्वव्यापकस्य विवर्णत्वनम्रमुखित्वरूपविधेययोर्बाधादन्वयासंभवेन स्वामिपालत्वादिसामानाधि
करण्येनैव विधेयत्वमावश्यकमिति तत्र तत्पदे पिवाप्रीतिरहस्यं॥ उदाहरणांतरं पक्षधर्मताप्रदर्शनायोपनय
प्रयोगः॥ विशिष्टपरामर्शस्यानुमितिहेतुत्वव्यवस्थापनेनोदाहरणांतरमेवैप वन्यायप्रयोगाः[illegible] मीमांसकमतेभि
रस्तं बोध्यं॥ उदाहरणोपनयरूपमवयवद्वयमिति बौद्धमतेतमप्यसमंजसं। कथायामाकांक्षाक्रमेणैवाभिधा
नात् प्रतिज्ञाद्युपन्यासस्यावश्यकत्वात्॥ धूमादित्येव प्रयोगो न तु धूमवत्त्वादिति। मतुपो व्यर्थत्वादिति येमन्यं
तेषां मते त्वयं वह्निव्याप्यो धूमइत्येवोपनयः स्यात्। न तु वह्निव्याप्यधूमवानयमिति मतुपो व्यर्थत्वादित्यवधेयं॥
अबाधितत्वासत्प्रतिपक्षत्वबोधाय निगमनप्रयोगः॥ न बाधासाधकस्य तदभाववत्ताज्ञानस्यैनाभावस्य वाहे
तुत्वं न तु तज्ज्ञानस्येति किं तद्बोध्य[illegible]वाच्यं॥ यद्वागमे सति चयन्न सत्त्वेति तत्रादत्तानज्ञानसाध्यमितिनियमेन
तज्ज्ञानस्य हेतुत्वात्॥ न च घटाभाववत्ताज्ञाने घटप्रत्यक्षानुदयेन तत्राप्रतिबध्यतावाप्तवज्ञानस्य कारणत्वापत्तिरि
तिवाच्यं॥ परोक्षज्ञाने तादृशनियमस्याभ्युपगमात्॥ अत्र केचित्॥ पक्षे साध्याभावो बाधः तद्वत्त्वञ्च साध्य
मेवेति पक्षे साध्यवत्ताज्ञानमनुमितिहेतुरिति आयातं॥ तथा वा सिद्धसाधनं यदि पक्षे साध्याभावभ्रमस्तौ बाधः॥

सि॰प्र॰७५

अनुमान ७५

तथापितदसाधारणज्ञानंविनापक्षेसाध्यनिश्चयस्यासंभवितयासिद्धसाधनतातादवस्थ्यमितिचेत्।पूर्वावगमेसतियन्नस
वर्तितत्तदसाधारणज्ञानेसतिनवस्येवेतिबाधासाधारणज्ञानेसतिनवस्येवेतिबाधाभावज्ञानेसतिबाधज्ञानानुदये
नबाधज्ञानानुदयेनबाधज्ञानप्रतिबंधाभिप्रायेणाबाधितत्वादीतिबोधनंनतुतज्ज्ञानस्यहेतुत्वाभिप्रायेणेति
वदंति।केचित्तु।अनुमितिजनमायं[illegible]नुरोधेनयोग्यतावल्लक्षणयानिश्चयसाधारणंअबाधितत्वादिहे
त्वपिहेतुरित्याहुः।नचतथापिगौरवेनकथमबाधितत्वादिबोधनंअपदार्थत्वाद्वाक्यार्थत्वाच्चेतिवाच्यं॥
तस्माद्बुद्धिमान्नित्यस्यानुवादत्वेनप्रयोजनजिज्ञासायामबाधितत्वादिज्ञानमेवप्रयोजनतयाऽवसीय
तेतावताचलक्षणयायदिचमानसबोधादिनापितात्पर्यनिर्वाहेलक्षणाकल्पनमन्याय्यं।यथाधूमो
स्तीतिवाक्यवीक्षणपरस्यापिआनुमानिकवह्निबोधमादायतात्पर्यनिर्वाहस्तथाअत्रापीतिविभाव्य
तदामानसएवतद्बोधइतिरहस्यमत्रानुसंधेयं।किंचिज्जल्पितमत्रतदाकर्ण्यरस[illegible]हृदिध्यायतांदोषे
रावमस्तुयुक्तिनिर्वहद्वाक्यंमदीयंबुधाः।चंद्रःकिंनकलंकितोपिसकलैःश्लाघ्यायग।यःसतांबालत्वं
यदितत्रहेतुरघुनाथालीयमेतद्वचः॥छ॥इतिश्रीदीक्षितशितिकंठरामविरचितायांसिद्धांतमंजरी
दीपिकायां[illegible]नुमानपरिच्छेदःसमाप्तिमगमत्॥ ॥अब्देतारणसंज्ञकेशुभवहसौम्याख्यवा
रेमुदामासेफाल्गुन[illegible]कृष्णपक्षेदशमीसायाह्नकालेशुभे।श्रीमद्दीक्षि[illegible]भास्कराख्यविदुषःपादा
अलंगरश्रास्तेनैतल्लिखितंप्रकाशजनकंतर्कप्रकाशासिधं॥१॥ ॥ ॥ ॥ ॥ ॥

पत्वात्वो विलक्षणाश्रिताविशेषमुपगंतव्यः ।। यदक्षावाचादनंतरं नत्थाद्दशानुव्यवसायः ।। एवं पंचानुमित्यनुव्यवसायस्य तादृ
शविषयताविशेषधर्मविषयकत्वे नोपपद्येरन्नमनुमिमीत्यस्य रूपजातिस्वीकारेणेति कुतस्तदवच्छिन्नकरणतया प्रमाणांतरत्व
मिति चेन्न ।। लिंगपरामर्शविरहे तादृशविषयताकज्ञानानुसस्यात्तदवच्छिन्नकरणतयैव तस्य प्रमाणांतरत्वमिति ।। व
स्तुतस्तु अनुमिनोमीत्यनुव्यवसायस्य तादृशविषयतामात्रविषयकत्वे आपत्तिः ।। शाब्दबोधानंतरमपि तादृशानुव्यवसा
यापत्तेः ।। अनुमित्यापत्तिः ।। शाब्दबोधादिष्वपि तादृशविषयतायाः एव स्यात् अनुमितित्वजातिसंतरस्वीकारे तु आपत्त्यादि
षु तादृशजातेरसत्त्वान्न तादृशानुव्यवसायापत्तिरिति तदवच्छिन्नकरणतयाऽनुमानस्य प्रमाणांतरत्वमावश्यक
मेवेति ।। एवं शाब्देऽपि वर्णानंतरं जायमानज्ञानोत्तरं शाब्दयामीत्यनुव्यवसायोत्पत्त्या तद्विषयतया सिद्धशाब्दत्वाख्य
जातिविशेषावच्छिन्नकरणतया शाब्दप्रामाण्यसिद्धिः ।। एवमुपमिनोमीत्यनुव्यवसायबलादुपमानस्यापि प्रमाणां
तरत्वमिति ।। ननु अस्तु अनुमितित्वादितयापि प्रत्यक्षत्वव्याप्यमेवास्तां तदवच्छिन्नकरणस्य न प्रमाणांतरत्वं ।। अ
यानुमित्यादेर्मानसत्वेन तदुत्तरं साक्षात्करोमीत्यनुव्यवसायापत्तिः ।। अनुमित्यादेः साक्षात्कारत्वादिति चेन्न ।। लौकि
कविषयताशालिसाक्षात्कारत्वस्यैव तादृशप्रतीतिविषयत्वात् ।। अत एव सुरभिचंदनमित्याद्युपनीतज्ञानानंतरं चंदनं
पश्यामि सौरभमिति सार्वजनीनः प्रत्ययः संगच्छते न चालौकिकविषयतायाः साक्षात्कारव्यंजकतया नानुमित्या
दुत्तरं साक्षात्करोमीति प्रत्ययः ।। अथैवं तत्र प्रत्यक्षत्वस्थले मानाभावः ।। साक्षात्करोमीतिप्रत्ययाभावेन प्रत्यक्ष
त्वस्याप्रयोजकत्वात् अनुमानस्य मानसत्वेन वक्तुमशक्यत्वात् ।। [illegible] ।। अनुमितित्वादेः प्रत्यक्षत्वव्याप्यत्वे
लाघवमेव ।। तथाहि ।। अनुमितिसामग्र्याः काले प्रत्यक्षवारणायानुमितिसामग्र्याः प्रत्यक्षं प्रति प्रतिबंधकत्वं क

157

कल्पनीयं॥ प्रत्यक्षत्वव्याप्यत्वे त्वनुमित्सात्मकप्रत्यक्षस्यैवोत्पत्त्या तादृक्कल्पनप्रयुक्तलाघवमक्षुण्णमेवेति॥ तदसत्॥ अनुमितित्वस्य चाक्षुषत्वव्याप्यत्वे त्वाच्चपरामर्शोत्तरोत्पन्नज्ञानेऽनुमितित्वापत्तेः॥ चाक्षुषत्वस्य तद्व्यापकत्वमत एवासंभवि परस्परव्यभिचारिणोस्तयोरेकत्रसमावेशे सांकर्यापत्तेरिति चाक्षुषत्वादिविरुद्धं तदुपगन्तव्यं॥ एवं चानुमितिसामग्रीकाले चाक्षुषादिवारणाय चाक्षुषादिकं प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वं कल्पनीयं॥ एवं च सामान्यतः प्रत्यक्षं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वं मयापि न कल्प्यत इति च लाघवं॥ ननु अनुमितित्वादेर्मानसत्वव्याप्यत्वमेवास्तां अनुमितिसामग्रीकाले मानसवारणाय मानसं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं॥ मन्मते अनुमित्सात्मकमानसस्यैवोत्पादेन तत्रेष्टापत्तेः॥ न च वह्न्यनुमितिसामग्रीकाले घटादिमानसवारणाय तत्र प्रतिबंधकत्वस्यावश्यकतया घटादिकमनिवेश्य मानसत्वमेव तत्प्रतिबाध्यतावच्छेदकमिति वाच्यं॥ घटमानसं जायतामितीच्छाया उत्तेजकत्वानुरोधेन विषयं निवेश्यैव प्रतिबंधकत्वकल्पनावश्यकत्वात्॥ एवं शाब्दादिस्थलेऽपीति॥ मैवं॥ घटादिचाक्षुषसामग्रीकाले वह्निमानसानुदयेन चाक्षुषसामग्र्याः मानसं प्रति प्रतिबंधकतायां घटादिचाक्षुषसामग्रीकाले वह्न्यनुमित्सुसत्त्वेऽनुमित्सन्यमानसत्वमेव चाक्षुषसामग्रीप्रतिबध्यतावच्छेदकमवत्तावाच्यमिति अनुमित्सन्यत्वनिवेशगौरवात्॥ एवमनुमितिसामग्रीकालेऽनुमित्यन्यमानसवारणायानुमित्सन्यमानसत्वमनुमितिसामग्रीप्रतिबध्यतावच्छेदकमुपेयमित्यनुमितिसामग्र्याः प्रतिबंधकत्वकल्पनमावश्यकमनुमित्सन्यत्वनिवेशे गौरवं पुनरधिकं एवं शाब्दोपमितिस्थलेऽपि शाब्दान्यत्वोपमित्सन्यत्वनिवेशाद्गौरवमिति तेषां न मानसान्तर्भाव इति सुतरां चत्वारि प्रमाणानीति दिक्॥ ॥ इति श्री शितिकंठदीक्षितविरचितायां न्यायसिद्धान्तमंजरीदीपिकायां उपमानपरिच्छेदः समाप्तिमगमत्॥ ७॥ ॥ ७ ॥ ॥ ७७७॥ शुभमस्तु लेखकपाठकयोः॥ ॥ ७

K K S U LIBRARY
RAMTEK
441 106
M-1676
Dist Nagpur

```
[OrderDescription]
,CREATED=28.09.20 11:50
,TRANSFERRED=2020/09/28 at 12:10:54
,PAGES=158
,TYPE=STD
,NAME=S0003742
,Book Name=M-1676-SIDHANTMANJARI DIPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,
```